श्रीगणेशायनमः॥अथर्षिद्वादशलक्षण्याः संक्षिप्तसूत्रशंकरः॥जिज्ञा
सुभ्योतिबालेभ्योतिस्फुटं गडनतः॥१॥लक्षणशब्दो मीमांसाशा
स्त्रेप्रमाणाध्यायोद्दिष्टः चोदनालक्षणोर्थो धर्मः अथातः शेषलक्ष
णमिति तेनद्वादशलक्षणी द्वादशाध्यायी॥तस्याधर्मोर्थो विषयः
॥तदुक्तं अथातो धर्मजिज्ञासासूत्रमाद्यमिदं कृतं। धर्माख्यो विष
यश्चक्तुं मीमांसायाः प्रयोजनमिति। धर्मशब्देन च गौतमीयादि

वन्नापूर्वमुच्यते किंतु तत्साधनं यागाद्येव॥तदुक्तं श्रेयस्करशा
स्त्रे॥धर्मश्च फलसंबद्धं कर्म यागादि वर्ण्यते इति। अपवादतया
चात्र धर्मोपि जिज्ञास्यो द्वितीयलक्षणभेदापवादत्वेनाभेदव
दिति नशास्त्रस्य विषयनानात्वं शंक्यं। इह धर्मजिज्ञासा दंन
विचारं लक्षयति। औपनिषदानां तु ब्रह्मजिज्ञासापारंपूरकमि
तिवैषम्यं। धर्मं जिज्ञासितुमिच्छतः तस्माद्धर्मो जिज्ञासितव्य

बाल० २

इत्यादिभाष्ये संबंधं क्रिययोर्द्वयोश्रुते शास्त्राच्चते पृथगित्यादिवा
र्तिके तद्व्याख्यार्थे च न्यायरत्नाकरे अध्ययनजिज्ञासाक्रिययोः सं
बंधमथशब्दो ब्रूते तेच शास्त्रारंभे भिन्ने नहि जिज्ञासाशब्दो मी
मांसापर्याय इति श्रौतार्थपरत्वस्यैवोक्तेः। तथा आनंतर्यवचोव्य
क्तिराश्रितैवार्थगम्यत इति वार्तिकेः। अथशब्दआनंतर्यार्थेनाधिकार
रार्थ इत्युक्तं। जिज्ञासापदस्य च विचारलक्षकत्वेधिकारार्थता

प्यविरुद्धेति। तृतीयेप्युक्तम्‌ प्रथमाध्यायप्रथमसूत्रे हि धर्मज्ञा
नेच्छा यावक्ष्यमाणव्याख्येयत्वेनानुपन्यासादनंतरानुष्ठेयमा
त्रमेवोपदेष्टव्यमित्यधिकारार्थत्वं नोक्तम्‌ इह तु अध्यायरूपं वा तद्
धर्मिकमेव वा व्याख्येयमाधिकर्तुं हि शक्यते शेषलक्षणमिति ग्रं
थयोरायेप्रथमसूत्रे विचारानुपादानादधिकारार्थता शेषस्यानाद
स्तीत्युक्तम्‌ द्वितीयग्रंथे तु तृतीयाध्यायाद्यसूत्रे विचारोपादानाद्

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

धिकारार्थतेतितस्मात्सर्वस्यशास्त्रस्यधर्मोविषयः।द्वादशानां
वैध्यायानांद्वादशविषयाः।प्रमाणभेदशेषत्वप्रयुक्तिक्रमाधिका
रसामान्यातिदेशविशेषातिदेशोहवाधतंत्रप्रसंगाख्याःसमुच्चा
स्यार्थस्यद्वादशविधस्यवक्ष्यमाणस्यप्रतिज्ञापिंडोयंधर्मजिज्ञा
सेतीतिभाष्यकारोभावाभावविषयाष्टविधजिज्ञासापरतयाध
र्मजिज्ञासापदंव्याकुर्वन्संक्षिप्यदर्शयतिकोधर्मःकथंलक्षणकः

कान्यस्यसाधनानिकानिसाधनाभासानिकिंपरश्चेति।तत्राष्ट
विधत्वंतावद्भासजिज्ञासायाःसाधनइवधर्मस्वरूपतत्प्रमाणतत्फ
लेष्वपियोजनेनाभिप्रेतं।तत्रपिलक्षणशब्दःप्रमाणवचनउपदेश
मिवातिदेशंतत्प्रामाणकोयंहवाधातिदिष्टपदार्थधर्मप्रतियो
गिभूतोसंगृह्णाति।लक्षणशब्देनैवचोपदेशातिदेशोवंदतोपदि
ष्टातिदिष्टपदार्थधर्मभूतोतंत्रप्रसंगोसंगृहीतो।साधनशब्देनचसा

धनास्यांगधर्मश्रुतोप्रयुक्तिक्रमो॥ संग्रहीतो। अत्रैव चसूत्रे ध
र्ममीमांसारभ्यानेवेति चिंत्यते। तदर्थं चाथशब्देन योग्यतयाध्य
यनानंतर्यमुक्तं धर्मजिज्ञासा कर्त्तव्येत्युपदेशात्मकजैमिनिसू
त्ररूपस्मृत्याधीयस्नाया इति स्मृतिर्बाधानवेति। तदर्थं चाध्ये
यनविधिः स्वर्गादिदृष्टार्थं उत फलवदर्थावबोधरूपदृष्टार्थइ
ति। तत्र सस्वर्गस्यादिति विश्वजिन्न्यायेन पूर्वपक्षयित्वा दृष्टेसम

वयदृष्टकल्पनाया नक्रा रा सिद्धांतितं। ततश्चाध्ययनविधे
मूलं याजैमिनीसूत्रस्मृत्याधीयास्नाया इति स्मृतेर्बाधाद्यथाव
दर्थज्ञानार्थं न्यायनिरूपणात्मिका मीमांसारभ्य॥ तत्राध्ययन
विधौ स्वाध्यायमिति द्वितीयायाः गुणत्वमेव लक्ष्यते न्यथा स्वा
ध्यायं वाजपेयवाक्याद्वयोगे गुणविधौ वैरूप्यं यते रितिभ
वदेवा। तन्नाश्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पनः ल

क्षणायाक्यभेदादिदोषोनानुमिते यासाविति वार्तिकोक्तं न्याये
नपरिहृतं॥ ॥इत्युपोद्घातः॥ ॥एवं द्वादशसूत्रासुलक्षणार्थं ज्ञा
पुज्जिज्ञास्येषु स्वरूपानंतरमपि जिज्ञास्यतयोक्तं प्रमाणं मानाधी
नमेयासिद्धिरितिप्रथमे ऽध्याये नादौ निरूप्यते। तच्चानेकविधि
ध्यर्थवादमत्रनमध्येयस्मृतिसाचारूपंतत्रार्थवादं पृथक्कृ
त्यविध्युद्देशापरनाम्नो विधेःफलांतो विध्युद्देश इतिभाष्यकार

लक्षितस्यधर्मप्रामाण्यमाद्यपादेनोच्यते॥ तत्प्रतिज्ञार्थं
चोदनसूत्रं। तत्रांग चोदना चोपदेशश्च विधिश्चैकार्थवाचिन
इति। तच्चेदधर्मलक्षणंद्वारासामान्यतो धर्मस्वरूपोक्तमर्थम
पितं चेदमर्थद्वयंवचनव्याप्तिरुद्यत एकेनापिसूत्रेणोक्तो। तत्रान्य
तरार्थोऽन्यतरार्थ। तत्रयो धर्म इत्युद्दिष्टसचोदनालक्षणश्चो
दनाप्रमाणकइतिप्रमाणकवचनव्यक्तिः। यश्चोदनालक्षणइत्यु

द्विरूपस्य धर्म इति स्वरूपवचनव्यक्तिः तत्र चोदनाप्रामाणकस्य
स्य धर्मलक्षणत्वान्निषेध्येपि च प्रवर्तनाविषयत्वेनैव विधेये निव
र्तनाविषयत्वेन चोदनालक्षणत्वादतिव्याप्तिं वारयितुमर्थ इत्यन
र्थसाधनत्वभावे पि विशेषणं श्येनयागव्यावृत्त्यर्थं तदिति भाष्ये॥
तस्य हि फलं हि सेति। तत्रोत्तरस्यां तावतैव पर्यवसानं। आद्यायां
तु द्वौ नियमौ विवक्षितौ॥ योधर्मस्य चोदनैव प्रमाणमित्येक

प्रत्यक्षानुमानबुद्धवाक्यादिव्यावृत्त्यर्थः योधर्मस्य चोदना
प्रमाणमेवेत्या परो नास्तिकाभिमतवेदाप्रामाण्यनिरासार्थः। इ
ति चोदनासूत्रार्थः तत्र धर्मनियमफलमुपपादयितुं प्रत्यक्षसूत्रं
संसंप्रयोगे पुरुषस्येंद्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्य
मानोपलंभनत्वात्। इति। तत्र श्रुत्या प्रत्यक्षमात्रस्य प्रामाण्यमुक्तं मर्थ्या
दितरेषां तदुक्तं भाष्ये। प्रत्यक्षपूर्वकत्वाच्चानुमानोपमानोपमा।ना

र्थापत्तिनामप्रकरणमिति। तत एव च बुद्धादिपुरुषवचन
नानिराक्रियापि सिद्धेति च। अत्र सर्वज्ञनिरासः प्रत्यक्षसूत्रं स
मानं। द्वितीयं नियमसाधनार्थं औपत्तिकसूत्रं। औपत्तिकस्तु शब्दस्या
र्थेन संबंधस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेनुपलब्धेस्तथा
मीणं बादरायणस्येनपेक्षया दिति। अत्र यस्य दुष्टं कारणं यत्र च
मिथ्याति। प्रत्ययः स एवासमीचीनः प्रत्य इति भाष्येक्त कारणदोष

ज्ञानस्याप्रामाण्यहेतोरभवः। पंचपदेनोद्यावयवनोक्तः भाष्यो
क्त द्वितीयाप्रामाण्यहेतोरभवः आव्यतिरेकश्चसनेन। तदुक्तं
औपत्तिकगिरादोषः कारणस्य निवार्यते। अबाधो व्यतिरेकेणेति।
तत्र शब्दो औपत्तिको नियमः अश्वज्ञात्यात्मा संबंधश्च संकेतरूपः
सामर्थ्यमिनेद्याद्यावयवार्थः उपदेशाविधिरूपस्य धर्मस्य ज्ञा
यतेनेन तिज्ञानं ज्ञापक इसेन नाज्ञापकस्वरूपस्याप्रामाण्यस्या

भावकः। तदुक्तं। अप्रामाण्यं त्रिधा भिन्नमिथ्याज्ञानं संश
येरिति। तथा। विधावनाश्रितेसाध्यः पुरुषार्थो न लभ्यते। श्रुतस्वा
र्गादिबाधेन धात्वर्थः साध्यता वृजेत्। विधौ तु तमतिक्रम्य स्वर्गादेः सा
ध्यतो तत्साधनस्य धर्मत्वमेव सति च लभ्यते इति। अर्थेनु फलस्य
इत्यनेन तु अनुवादकत्वं निरस्तं। अनपेक्षत्वादित्यनेन च प्रामाण्य
स्य स्वतस्त्वं कारणगुणौ संवादार्थक्रियाज्ञानानधीनत्वरूपमुक्तं

प्रामाण्यं त्वर्थतथात्वरूपं विषयधर्मः यन्निमित्तो ज्ञाने प्रमा
णबुद्धिव्यपदेशो भवतः तच्च स्वतो गृह्यते ज्ञाने नैव विषयीक्रि
यते पटादिवत् अप्रामाण्यं त्वर्थान्यथात्वं बाधकज्ञानकारणदोष
ज्ञानविसंवादज्ञाने गृह्यते इति परतः तथा ने नैव सूत्रावयवे
न लौकिकवाक्ये वक्तृज्ञानहेतुनिश्चयापेक्षत्वं प्रामाण्यप्रतिष्ठा
यां वेदे तु वक्तुरभावेन तदनपेक्षत्वादेव न तदाभावाद्यपार्थते

सुक्तं। तदेतदुभयमपेक्षयाहि। तिसूत्रावयवोक्तत्वात्तद्वाख्यानावसरे भाष्यमप्यनागतापेक्षणेनवक्ष्यमाणतयैव चोदनासूत्रएव वार्तिककृतोक्तं। औपत्तिसूत्रएवचभाष्ये निरालंबनवादनिरासे नबाह्यार्थसद्भावउक्तः ततश्चोदनायास्तदर्थस्यधर्मस्यतत्फलस्यचागमस्यसत्येधर्मप्रामाण्ययुक्तंनान्यथाति। एवंमद्वानिकसमं तशून्यवाददुषणमपि। इयंतन्मतयोर्भेदनिरालंबनवादेवा

ह्योविषयोपिनास्तिनीलाद्याकाराअपिनसंविदुताः इति। अतएव तान्निरासावसरे तन्मततात्पर्यमनूदितामाचार्यैः स्वच्छस्वज्ञानरूपस्यनहिभेदःस्यातोलितइति। शून्यवादमतेतुसंविदुतानीलाद्याकाराःसंतीतिएवंसिद्धेबाह्योर्थयन्माध्यामिकेरुक्तमर्थाभावादेवज्ञानमपिनास्तीतितदपिहेतुनिरासादपनिरस्तं। एवंस्फोटनिरासोप्यत्रसूत्रेचोदनायाधर्मप्रामाण्यसिध्यर्थमेव। ऊडा

रिमा हि धर्मश्चोदनाप्रमेयः ऊहश्च पदार्थधर्मः पदार्थसत्त्वे कथं
प्रमीयेत। एवं पदार्थमृषात्वेपि तदाश्रितमूहतंत्रप्रसंगादि। तदुक्तं
स्फोटनिरासस्य नेष्कल्पशंकापूर्वमाचार्यैः। वर्णातिरिक्तः प्रति
षिध्यमानः नः पदेषु मंत्रफलमादधाति। कार्याणि वाक्यावयवा
श्रयाणि सयानि कर्तुं कृत एष यत्न इति। अनेनैव यथाविधांतरेण
पिथैर्मेपि मिति सिद्धिरस्य फलं श्रेयः साधनधर्मप्रमितिर्हि स्वर्गा

रिश्रेयस्तत्साधनं यागादिपदपदार्थयोर्मृषात्वेन स्यादिति। अ
स्मिन्नेव वचसूत्रे आनियप्यत्तिः शब्दार्थत्वे वेदप्रामाण्यापत्तस्तस्या मा
पनाय ण्यप्रतिष्ठेति पिषायां नियाकृतिः पदार्थभूतास्त्वाप्यते। आ
कृतिवादेन। आकृतिश्च मीमांसकानां जातिः। जातिमेवाकृ
तिमाहुर्व्यक्तिराक्रियते यया तिवार्तिकात्। तस्याश्च सौगताभिम
ता नावस्तुरूपतु छान्यायाहरूपत्वे पुनर्वेदप्रामाण्यापत्तेर्भावरूप

तोपयादिता ऽपोह्य वदनातत्रोचनवादेनादिवसरमाण्यादिपुं
आत्मएवावयवीनार्थांतरमिसाशंक्यातस्याप्रत्यक्षेनव्यवहा
रानुपयोगित्वात्संगतिमद्वाद्यसंभवेनतन्मूलकवेदप्रामाण्यवांहे
तिकप्रामाण्यासिध्यर्थमेवचनादिदृष्टांतवैषम्योपयादनेननिरस्ता
।ततःपदपदार्थसंबंधस्येश्वरकर्तृसंकेतात्मकत्वेपिवेदप्रामाण्यापत्ते
स्तत्प्रामाण्यायेवेश्वरनिरासःसंबंधाक्षेपपरिहारेण।ततोयःप्रत्य

क्षसूत्रेअनिमित्तंविद्यमानोपलंभनंतत्रादिसमयवेनानंतर
फलानुपलब्ध्याचित्रादिचोदनाक्षेपःकतःसपरिहृतः।ततोयस्ते
नेवप्रत्यक्षसूत्रावयवेनसएवषैयज्ञायुआत्माऽंजसास्वर्गंलोकं
यातीत्यादिचोदनानांयज्ञायुधवतःशरीरस्यस्वर्गगमनंसभ
वस्तुप्रत्यक्षविरोधात्तत्प्रामाण्याद्याग्निहोत्रादिचोदनानाम्
प्रामाण्यक्षेपःकृतस्तत्परिहारःआत्मसाधनेनात्मवादकृतातदेतद्

भयमप्यव्यतिरेकश्रेयसयवेनैवोक्तमिति। तदेवं षोडशाप्य
र्थसूत्रओपपत्तिकादिके। प्रामाण्यसिध्यर्थं चोदनायानिरूपिता
इत्योपपत्तिकसूत्रं समाप्तं॥ ॥कर्मकेतत्रेदशनादिद्याधिकरणेच
वेदप्रामाण्यसिध्यर्थमोपपत्तिकसूत्रएवोपपत्तिकस्वरूपानियतस्पश
ष्टार्थरूपोभयविशेषणविशिष्टेसंबंधेन्यग्रादिशेषणीभूतशष्टनि
त्यत्वमप्यर्थप्राप्तिज्ञातमेव। क्षिप्रसमाधीयतेतदिदमष्टादश

सूत्रकंशष्टाधिकरणंनाम। तत्रस्मृतिभूताधिकरणेनसूत्रत्रय
घटितेनकरणासभाद्धर्मप्रमियाशक्तिचोदनानामाशंक्याप
दार्थकरणस्वप्रतिपादनेनचोदनाप्रामाण्यमेवोपपादितं। त
तोवेदांश्चैकेसंनिकर्षपुरुषाख्याइतिषट्सूत्रेणचदाधिकरणे
नरघुवंशादिवत्पौरुषेयत्वंचोदनानामाशंक्यनिरस्तं। तदेवं
कृत्स्नेनाप्याधाधायापादनेचोदनाप्रामाण्यमेवाद्वितीयसूत्र

प्रतिज्ञातं साधितं। तदुक्तं। इति प्रमाणत्वमिदं प्रसिद्धं युक्तं अर्थात्
प्रतियोदनायाः अतः परं तु प्रविज्ञ्रहेत्वन्तरे वेदं त्रेधा ततो वस्पतिति
यार्थ इति॥ इति श्रीमत्सद्वाक्यप्रमाणपारावारपारीणधुरीणमी
मांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टरंगकर
कृते मीमांसासारसंग्रहे बालप्रकाशे प्रथमप्रमाणार्थानुक्रमणं
समाप्तं॥ अतः परमधिकरणरत्नमाला भाष्यवार्तिकशास्त्रदीपिकादि

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इंस्टीट्यूट स्मारकम्

ग्रंथेषु स्फुटैव। केचित्तु मीमांसकसिद्धांताः शास्त्रे तत्र तत्र विप्र
कीर्णा नातिस्फुटाश्च बालव्युत्पत्यर्थमुद्धृत्योच्यंते। तत्र प्रामाण्यं
तत्र मीमांसकानां विभक्तं विभागेनानेकविधं तथाहि। प्रत्य
क्षमनुमानं शब्दउपमानमर्थापत्तिरभावइति षट्। तत्र प्रत्यक्षं
षड्विधं चाक्षुषादिभेदात्। अनुमानं द्विविधं। सामान्यतोदृष्टं विशे
षतोदृष्टं च। द्विविधमपि पुनर्द्विविधं स्वार्थं परार्थं च। केवलान्व

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी इंस्टीट्यूट स्मारकम्

'यि केवलव्यतिरेकिभेदौ तु नेष्टौ।। लिंगिज्ञानं च तद्रूपस्य स्वरूपलिंगतो न तदस्यनुमानेन रूप्यवर्जितस्य लिंगत्वासंभवोक्तेः।। परार्थानुमानवाक्यस्य च तावेव कारणं। मिवन पंचावयवाः किंतु त्रय एव तदुक्तम् तत्तु पंचतयं केचिद्द्वयमन्ये वयं त्रयमः उदाहरणपरयंतं द्वौ उदाहरणादिकमिति। प्रसक्तानुमानोपमानाभावरूपा निचत्वारि लौकिकान्येव। अर्थापत्तिर्द्विविधा। दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चो

उत्तरापि द्विविधा लौकिकी वैदिकी च। शब्दोपि द्विविधो लौकिको वैदिकश्च। वैदिकोपि द्विविधउच्यते। उपदेशो ऽतिदेशश्च। उपदेशोपि द्विविधः।। विधिनिषेधश्च। विधिनिषेधभेदान्वक्ष्यामः पुनरोपदेशो नेकविधः शब्दांतरमभ्यासः संज्ञागुणः प्रकरणांतरं चेति द्वैतीयकानि कर्मभेदकानि षट् श्रुतिलिंगवाक्यप्रकरणक्रमः सामार्थ्याचेति तृतीयानि विनियोजकानि। षट् श्रुतिरर्थः पाठक्रमः स्थानक्रमो मुख्य

क्रमः प्रवृत्तिक्रमश्चेति पांचमिकानि क्रमप्रमाणानि षट्। प्रयक्षावि
धिरभावाविधिः विकारः स्वशब्दो निषेधानुवादश्चेति नावमिकानि
कर्यपतिप्रमाणानि पंचेति अतिदशरुसप्तविधो वक्ष्यते॥३०॥ क्र
तिरपि चतुर्विधा॥ विधिप्रतिषेधोभिधात्री विनियोक्त्री चलिंगं द्विवि
धं। शब्दसामर्थ्यमर्थसामर्थ्यं च शब्दसामर्थ्यमपि द्विविधं। अर्थसा
मर्थ्यमपि द्विविधं मंत्रस्य कर्मसमवेतार्थप्रकाशनसामर्थ्यमेकं

वाक्यतोपगमनसामर्थ्यं च। तत्रोत्तरं लिंगं वाक्यविरोधाधिकर
णे भाष्यकृता व्यवहृतं पूर्वं लिंगाध्यता च तस्योक्ता। न तु स्योनतं इ
त्यस्य यथैवो शब्दस्य यथैवोपस्तरणाभिधानसामर्थ्यमेवमुत्तरणे
कवाक्यतामुपगतुं सामर्थ्यं सामर्थ्यं च लिंगमित्युच्यते। तस्माद्द्वि
मन्त्रवाक्ये लिंगमेव बाधितं भवतीति। सत्यमेवं। एतदपि लिंगं। लिंग
मपि खल्वेतदेवलक्षकं विप्रकृष्टार्थमेव भवति। लिंगोदेकवाक्य

ता। तस्माद्। अभिधानसामर्थ्यं। ततः क्रत्वर्थ इति विप्रकृष्टार्थेति
ग्रंथेन। वाक्यमपि द्विविधं। माहावाक्यमवांतरवाक्यं च। तदुक्तं।
स्वार्थबोधे समाप्तानामंगांगिभावापेक्षया। वाक्यत्वमेव वाक्यत्वं पु
नः संहत्याऽऽम्नायत इति तत्राद्यं प्रयोगविधिरूपं निरानुमेयमेव। क
ल्पितांगवाक्येकवाक्यतायां हि प्रधानविधिरेव प्रयोगविधि
रिति द्वितीयं तु सामिधेयजातिदर्शपूर्णमासाभ्यां स्वर्गकामो य

जेतेत्यादि। अवांतरवाक्यमपि द्विविधं विधिमंत्रश्च। अर्थवादस्तु तत्प्र
यभावेपि स्तुतिलक्षकवाक्यार्थप्रतिपादकत्वमात्रेणे पृथगव्यापरि
स्पतो। प्रकरणमपि द्विविधं। माहाप्रकरणमवांतरप्रकरणं च। तत्राद्यं प्र
धानस्य द्वितीयं प्रधानस्यांगस्य वा तथाद्यं प्रकृतेर्विकृतेश्च। एवं द्वितीय
मपि। तत्र प्रकृतेरसंदेशो दृष्टांतः। यथा दर्शपूर्णमासादेः। विकृते
र्मंडिप्रकरणं तु संदेशेनापि भवत्यसंदेशेनापि। तत्रायं यथा राजसूये

राजसूयायद्येनाऽऽसुनाति। राजसूयेनेजानः सर्वमायुरेतीतिसंदेशेनो
भूतंक्रमप्रकरणबलाबलाधिकरणेशास्त्रदीपिकायमुक्तं। असंदेशेना
पिविकृतेर्महाप्रकरणंयथा। यत्रविकृतौप्रकृतिक्रियानुपादेनाकिंचिद्
हितंतत्रप्रकरणेनगृह्यते। यथाप्रयाजेप्रयाकृष्णालजुहोतीति अहि
नामकद्वादशाहेचद्वादशदीक्षाद्वादशोपसद इतिद्वादशत्वं। तदुक्तं श्रुति
लिंगाधिकरणे। इतिकर्तव्यतांशास्त्रं। येनोद्देशोपसत्क्रियां। द्वादश

त्वविधिस्तेनकथंभावेनगृह्यतइति। अत्रचक्रियामुद्देश्येयुक्तेर्विकृतेद्र
व्योद्देशेनजामादिविधौवौदुंबरोयुपोभवतीत्यादौनप्रकरणग्राह्यतेयु
क्तम्। अतएवोक्तचित्राधिकरणेपि। नायातरक्रियायोगादृतेधात्वोपकलि
तात्। गुणद्रव्येकथंभावेगृह्णंतिप्रकृताःक्रियाइति। नचौदुंबरवाक्येयु
पलक्षितनियोजनसंबंधोवाक्यीयइतिवाच्यं। आनर्थक्यपरिहारस्य
सन्निधिनैवासिद्धः। यूपपरिछेदिकयाश्चौदुंबरजातेरार्थापत्तिकयो

जनाद्यपात्अन्यथाऽवधातादपि श्रीहिलक्षितयागान्वयस्यावाक्यी
यत्वापत्तेः यत्रतुप्रमाणांतरक्रियान्वयलाभः तत्रैवलक्षितक्रियान्वयंया
वद्विधिरायात्यतेपर्णमय्यादिवाक्यइति। एवंचवक्ष्यमाणेषुवातिकादि
ग्रंथेषु यत्प्राकृतांगानुवादेन विधीयतइत्यादिषुअंगशब्दक्रिया।व्यपरण
वेतिध्येयमितिसंदेशेनचविकृतेर्महाप्रकरणंराजसूयइवनकेवलंया
चनिकविकृत्यंगंसंदर्भेशेनैवभवतिकिंतुदंशस्यानेकविधत्वादनेक

विधतथाहि। प्राकृतांगानुवादेन विहिताभ्यांसंसृष्टंयदसंयुक्तमपिवि
कृतौ श्रूयतेतदपिप्रकरणेनगृह्यते। प्राकृतांगानुवादेनविहितयोः हेप्र पूर्वपश्चात्तनयो
करणमंडणोक्तेर्मध्ये यत्तद्विहितंकल्पभावात्तथाविकृतेः पूर्वमसंयु
क्तंकिंचिद्विहितंततःपूर्वंतुप्राकृतांगानुवादेनयदिविहितंततोऽसंयुक्तं
यत्तद्विकृतिप्रकरणेनगृह्यते।तथाविकृतेरनंतरमसंयुक्तंकिंचिद्विधाय
विहितमनुवादेनविहितं प्रकरणंप्राकृतांगानुवादेनकस्मिंश्चिद्विहि

तेपूर्वमासंयुक्तं। प्रकरणेन गृह्यते तद्दिदेभेदद्वयं बलाबलाधिकरणवार्ति-
केउक्तं। यस्यांतु विकृतौ प्राकृतांकिंचिदंगं संकीर्यते स्यपुरस्तात्परस्ता
द्वैवैकृतमगमान्नायेतत्रकथं भावयद्धितांगमध्यवातिर्वाप्रकरणप
टो विज्ञास्यातइति। ततद्वार्तिकं सोमेश्वरेण। नतरभेदत्रयपरत्वेनयोजि
तं। तथा विकृतेः पूर्वमसंयुक्तं किंचिद्विहितं ततपूर्वंतुविकृत्यनुवादेन
यद्विहितं ततोसंयुक्तं यतादृकृतिप्रकरणेन गृह्यते। तथा विकृतेरर

रनंतरमसंयुक्तं किंचिद्विधायविकृत्यनुवादेनकस्मिंश्चिद्विहितेतपू
र्वमसंयुक्तं प्रकरणेन गृह्यते। तद्दिदेभेदद्वयं विकृत्यानुवादेन विहि
तस्य प्रकरणे ग्राह्यतोत्तैनेवार्थादिलं भवति। अस्यचभेदद्वयस्य पूर्वेकि
स्यचभेदत्रयस्योदाहरणानि मग्नाणितथा सांग्रहणीविधायतदंग
प्राकृतस्य परिधिपरधाने ध्रुवास्तीत्यादीन स्त्रीन्मत्रान्वैकृतान्विधाय
मनमस्यामनस्यादेवा इति तिस्र आहुतीर्जुहोतीयामनहोमाः प्रकर

असयुतं। विहिताः ततस्तेषां यस्य याजानां पुरस्ताज्जुहुयाद्दहिरा
सानं सआतांस्थाद्यदनु याजानां परस्तात्स्वर्गलोकमत्रामेन्मध्येजु
होति मध्यत एव सआताना मासन्धत्त इति प्रयाजानुयाजैः सहक्रमो
विहितः तेन प्राकृतांगसंबंधित्वेन विधानात्सो ग्रहणी प्रकरणानुवृत्ते
रामनहोमाः प्रकरणेन गृह्यंते तदेतच्चतुर्थतंत्रसारे फलवद्दोक्तं हतु
त्वादितरस्य प्रधानं स्यादित्याधिकरणे उक्तं। माहेंद्रस्य स्तोत्रं प्रयाभिषि

च्यत इत्यत्र तु अभिषेकादेराभिषेचनीयप्राकृतांगसंबंधित्वेन विधाने
पि नतेन प्रकरणनुवृत्तिर्मध्ये विहितमभिषेकादि गृह्यत इति सभ
वति तन्मध्ये अभिषेकादि विध्यभावादितिसूर्याधिकरणे अभिहितमिति
। अतएव मिश्राअपि न्यायरत्नमालायां मामनेहोमानां प्रकरणयाग्य
तामाहुः विकृतिष्वपि यत्प्राकृतांगमध्ये पठितं यथा मानहोमा इति
स्य प्रकरणे न ग्रहणमिति ग्रंथेन। भट्टसोमेश्वरस्तु बलाबलाधिक.

रणे क्रमलेजस्यपि सांग्राहण्यपेक्षितस्त्रआहुतीर्जुहोतीत्यादिभिरेकवा
क्यत्वोपपत्तेरिति ग्रंथेन क्रमादेवामनहोमानामगतामाहतदपिशष्टा
दभ्युपेयैवादमात्रमिति ज्ञेयं। यदपि मिश्रैः शास्त्रदीपिकायां चतुर्थफ
लवद्धेतुत्वादित्यत्र संनिधिनापि तदधिकरणमाद्यत्वमुक्तं तदप्यभ्यु
पेयवादमात्रं। अत एव तंत्ररत्ने प्रकरणग्राह्यता मुक्ता संनिधिनापि
तदधिकरणसिद्धिरुक्ता। तदेवं यत्र प्राकृतांगानुवादेन द्वादशोपसत्व

वद्विधिरुक्तरूपासत्वविधं संदंशो वा तत्रैव विकृतौ प्रकरणं विनियोजक
मन्यत्र संनिधिरेवेति सिद्धौ एवं प्रधानस्य मात्रा प्रकरणं तु प्रकृतेरसंदंशो
द्धृतिकं विकृतेस्तु संदंशोद्धृतिकमपि निरूपितं। अवांतरप्रकरणं तु संदं
शोद्धृतिकमवेत्य प्रकृतेर्नास्त्येव प्रकृयंगस्य तु प्रयोजनानामभिक्रमा
धिकरणयुक्तं। विकृतेस्त्ववांतरप्रकरणं संदंशोद्धृतिकं सप्तमप्रणया
नाधिकरणवत् प्राप्रधानसानमुक्तं। तत्र हि उपात्रलयतीति करणप्रधानसा

वांतराप्रकरण। धीतमपिनवेश्वरेवउत्तरवेदिमुपचपातिनं सुनासीरी
यइतिपर्युदासोकथावयताबलादेवावांतरप्रकरणबाधित्वा चातुर्मास्यना
मेवात्रेतिवादइत्युक्त। इतिप्रकरणनिरूपणं॥ क्रमोपि द्विविधःपाठसादृश्य
मनुष्ठानसादृश्यंचपाठसादृश्यमपिद्विविधं। यथासख्यपाठःसंनिधिपाठ
श्चासमाख्यापि द्विविधलौकिकीवैदिकीच। पुनरपिसमाख्याद्विविधासा
मान्यसख्याचाविधिरपिद्विविधःप्रत्यक्षकल्पश्चप्रत्यक्षोप्येनकथावस्थ

ने। कल्पोपिनानास्मृतिकल्पआचारकल्पविधिकल्पोर्थवादक
ल्पोमंत्रकल्पश्च। तत्रविधिकल्पोयथाविशेषणविधिःअर्थवादक
ल्पस्तुद्विविधःस्वतंत्रार्थवादकल्पोविध्यंतरशेषार्थवादकल्पश्चआ
द्योपित्रिविधःफलार्थवादकल्पःसिद्धवत्कीर्तनार्थवादकल्पःउपा
स्यानार्थवादकल्पश्चअत्रापि द्विविधःएककर्तृकोपाख्यारूपपर
कृतिकल्पोनेककर्तृकोपाख्यानरूपुराकल्पकल्पश्चतत्रफलार्थ

वारकल्पोयथयस्य पर्णमयीजुहूर्भवतिनसपापं श्लोकं शृणोतीति
।सिद्धवत्कीर्त्तनार्थवारकल्पोयथात्रीणिहवेयज्ञस्योदराणि गायत्रीबृह
सानुष्टुप्अत्रद्वेवाचयं यस्तएवोद्यंतीति।परकृतिकल्पोयथा
ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासेप्रोयच्छदिति।इ
द्रस्येदमुपाख्यानंतस्मादिंद्रोविभेदियुपक्रमात्तस्यच्छदितिक्रियायां
कर्तृत्वेनानुषंगात्।पुराकल्पकल्पोयथा।वाचुसामग्नीषोमा

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

वाऽपस्यैवनावुपांशुपौर्णमास्यायाजनिति।विध्यंतरशेषार्थवार
कल्पोयथाऽपरिहिदेवेभ्योधारयतीति।मंत्रकल्पोपिद्विविधःमंत्र
गतास्यातस्यैवलेटकल्पनात्।विधियुक्तवाक्यंतरकल्पनाच्चातत्रा
द्योयथावसंतायकपिंजलानालभतइति।द्वितीयोयथोपांशुयजाद्दे
यज्यानुवाक्यासूक्तवाकादिमंत्रकल्पोदेवतादिविधिःयथावाऽध्व
।दिवदक्षिणावंतोऽस्तुर्येऽध्वराःसहतेसूर्येणसध्वरानकल्पविधि

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारकम्

तदेतद्विरोधाधिकरणभंगटीकाव्याख्यानांते सामेश्वरेणोक्तं अथप्रत्य
क्षविधिभेदः प्रायाश्च उच्यंते ते च केचित्स्मार्ताअपि संभवंतः प्रत्यक्षभेद
भेदप्रदर्शनेनैवोक्तं प्रायाइति न पृथगुच्यंते केचित्स्मार्ताएव संभवं
तीति तत्र तत्र वक्ष्यंते। पुनर्विधिर्द्विविधः अर्थकर्मविधिर्गुणकर्मवि
धिश्च। गुणकर्मविधिरपि त्रिविधः अदृष्टार्थो दृष्टार्थो उभयार्थश्च।
उत्तरो द्विविधो प्रतिपत्तिरूपस्तथारूपो च। तत्र दृष्टार्थप्रतिपत्तिर्यथा

थाचावाले कृष्णा विषाणं प्रश्नपतीति। उभयार्थप्रतिपत्तिर्यथाश्रयि
कर्मा चिष्टकृदादि। अप्रतिपत्तिरूपं दृष्टार्थं गुणकर्म यथा व्रीहीन वहं
ति अप्रतिपत्तिरूपमुभयार्थं गुणकर्म यथा पशुपुरोडाशयागाद्याश्रयि
कर्मा पुनरपि विधिश्रुतिविधिः उपत्तिविधिर्विनियोगविधिः प्रयोगवि
धिरधिकारविधिश्च। तत्रोपत्तिविधिश्चतुर्विधो। पि प्रसेकं द्विविधः
क्रत्वर्थपुरुषार्थश्च। तत्र क्रत्वर्थउपत्तिविधिर्यथा ग्रीष्मे प्रोक्षतीत्यादि

सामिधो यजतीत्यादिः। पुरुषार्थउत्पत्तिविधिर्यथाग्निहोत्रं जुहोतीत्यादिक
स्वार्थविनियोगविधिर्यथा व्रीहीनवहन्तीत्यादिः पुरुषार्थो विनियोगविधिर्य
थाइष्ट्यार्जनविधिः कृत्स्नार्थः प्रयोगविधिर्यथारंभणीयादिविधिरातिदेशि
कफलदेशाद्येकवाक्यता पन्नः पुरुषार्थप्रयोगविधिरपि द्विविधः अवा
तरप्रयोगविधिर्महाप्रयोगविधिश्चात्राद्यो यथा पौर्णमास्यां पौर्णमास्या
यजेतेअमावास्यायामममावास्यायां यजेतेत्यादिः। अत्र फलवाक्ये करण

त्वेनैव प्रयोगावच्छेदेनैकमीषो विधेयत्वात्स्य करणत्वात्सिद्धमंगसा
द्दियमन्योन्यमपि विवक्षितं फलस्यापि च विधेयत्वात्तदेकत्वमपि वि
वक्षितं विधेयत्वमेव च विवक्षा बीजं नोपादेयत्वं तद्विशेषणत्वं चेति नृ
फलयामुक्तं नोपादेयत्वमेवं चेकं विवक्षा कारणमात्र। विशेषणविवक्षा
यां कारणं हि मद्द्विधिरिति। एकं मुख्यं। अतस्त्रिकस्यापि चकस्यैक
प्रयोगत्वात्सिद्धिरेकादशोक्तपौर्णमास्यधिकरणवार्तिकोपपादितो

पपन्ना। महाप्रयोगा विधिर्यथा समेदर्शपूर्णमासाभ्यां यजेतेति अत्रा
पि मेकप्रयोगता साधकः पूर्वोक्तो विलोपिन्यायस्तुल्यः तस्य फलमेकः
सकल्पः क्रत्वर्थोपिका विधिरपि द्विविधः नैमित्तिकः सन्दोषनिर्घातार्थोपि
च। तत्राद्यो यथा भिन्नेजुहोतीति। एतदुदाहरणं शास्त्रदीपिकायाद्द्र
शेसमुच्चयस्तवदोषानिर्घातार्थो विस्तरेणोक्तं तन्नविध्यतिक्रमो हि दोषः
अंगनाशो च विध्यतिक्रमः कपालं च। सदनोपात्तमंगातेन कपालभे

दंगत्रेषणदोषात्तन्निर्घातार्थ एवायं होमः। अत एव पष्टेअर्थसमवा
यप्रायश्चित्तमेकदेशोपि सत्र एकदशभेद एवायं होमय। इति पूर्वप
क्षेइतुर्होमो यभिन्नसंस्कारो भेददोषनिबर्हणादित्युक्तं। नच भेददो
षो नतिसिद्धं तद्धेतुरुक्तः। किंतु हृदंतर मेव नित्यानित्यसंयोगविरोधः
एतदस्माभिः शास्त्रादीपिकाप्रकाशेउक्तं तस्माद्दोष निर्घातार्थनै
मित्तिकोदाहरणमश्वप्रतिग्रहेरिर्जजभ्यमानः मंत्रो किश्चेति। द्विती

योद्विविधः विहितातिक्रमनिमित्तको निषिद्धाचरणनिमित्तकश्च तत्रा
द्योयथा यद्वृक्षो यज्ञआर्तिमियाद्भूः स्याहेति गार्हपत्ये जुहुयात्स्यादिः
ऋग्वेदादिनिषिद्धाचरणेप्यस्य प्रवृत्तेर्द्वितीयोदाहरणमापदमेव पुरुषा
र्थोऽधिकारविधिस्त्रिविधः काम्यो नैमित्तिकस्तत्वलितश्च काम्योपि द्विवि
धः कर्मफलसंबंधपरः गुणफलसंबंधपश्च। तत्राद्यो यथा दर्शपूर्णमासा
भ्यां स्वर्गकामो यजेतेत्यादिः। द्वितीयो यथा दर्शेंद्रियकामस्य जुहुयात्

दित्यादिः नैमित्तिकोपि द्विविधः नियतनिमित्तकः। अनियतनिमित्त
कश्च तत्राद्यो यथा। यावज्जीवमग्निहोत्रं जुहोतीत्यादिः द्वितीयो यथा
। यस्य हिताग्नेरग्निर्गृहान्दहेत्तामवलेग्नये पुरोडाशमष्टकपालं नि
र्वपेदित्यादिः तृतीयो द्विविधः निमित्तजन्यदोषनाशफलं सत्वलितइ
तरफलं संवलितश्च। तत्राद्योपि द्विधः विहितातिक्रमनिमित्तको नि
षिद्धाचरणनिमित्तकश्च। तत्राद्यो यथा॥ यो मावास्यां पौर्णमासीं वा

ति पातयेदग्नयपाधिकृते द्वादशकपालं निर्वपेदित्यादि। निषिद्धाचरणनिमि
त्तको यथा। यद्येकं यूपमुपस्पृशेदेष ते वायो इति ब्रूयादित्यादिः। इतर
फलं संवालितो यथा वैश्वानरद्वादशकपालं निर्वपेद्युत्रेजात इत्यारभ्यप
स्मिन्जातएतामिष्टिं निर्वपति पूत एव सतेजस्व्यन्नादइंद्रियावीपशुमानभ
वतीत्यतोजाते ष्टिविधिः। पुनरपि विधिरेकादशविधः। सामान्यविधिवि
शेषविधिः प्रतिप्रसवविधिरभ्यनुज्ञाविधिरुपसंहारविधिर्व्यवस्था

इह विधिः पर्युदासविधिरभावविधिः साधारण्यविधिरुत्कर्षविधिरपकर्षवि
धिश्चेति। तत्राभ्यनुज्ञाविधिः प्रतिप्रसवाभिन्नोप्यस्ति यथा पाणालुकर्म
णामस्पर्शीणि कर्माणि जीवका। यजनाध्यापनेनैव विशुद्धाञ्चप्रतिग्रह
इति। तथा प्रतिप्रसवरूपोप्यस्ति क्रीतराजकोभोज्यान्नइति। तथा
प्रतिप्रसवोप्यभ्यनुज्ञानविधिभिन्नोप्यस्ति पूषाप्रापिष्टभागइति।
अतस्तौपृथगुपात्तौ यद्यपि चोपसंहारविधिभेदएव प्रतिप्रसवादिविधे

रपिचसामान्यविधिविशेषविधिभेदौ सभवतस्तथापिभेदंविनापिसा
मान्यसंभवाद्गोबलीवर्दन्यायेनपृथगुद्देशः एकादशविधोपिचविधिः
पुनर्द्विविधः क्रत्वर्थः पुरुषार्थश्चातत्रक्रत्वर्थः समान्यविधिर्यथायदाहव
नीये जुहोतीति। पुरुषार्थः समान्यविधिर्यथा पुत्रकामेष्टिः। क्रत्वर्थो
विशेषविधिर्यथा पदेजुहोतीति पुरुषार्थो विशेषविधिर्यथा यः कामये
तवीरोमआजायेतेति सचतुर्होतारं जुहुयादिति वीरपुत्रकामनायां। हि

चतुर्होतृहोमनथापुत्रसमान्यकामस्यैवपुत्रेष्टिः। क्रत्वर्थोप्रतिप्र
सवविधिर्यथा। पूषाप्रपिष्टभागइति। पुरुषार्थः सयथा ग्रहणेसूत
केपिश्राद्धविधिः स्मार्तः पुनः प्रतिप्रसवविधिः पंचविधः॥ लुप्तार्थ
प्रतिप्रसवः। निषिद्धप्रतिप्रसवस्तुपुरुषप्रतिप्रसवः। नियमविधानफ
लस्योपावर्तितं यत्रद्विषयप्रतिप्रसवः। परिसंख्यायाउपावर्तितंयत्र
द्विषयश्चेति। तत्राद्योयथा। पूषाप्रपिष्टभागइतितार्तीयः। दाशमिक

श्वकृष्णालचरो घृतेश्च पचतीति। द्वितीयो यथोदाहृतः स्मार्तः। ग्रह
णेसूतकेपिश्राद्धविधिः स्मार्तकर्मपरित्यागो राहोरन्यत्रसूतकइति
राहोरन्यत्रनिमित्तेयस्मार्तकर्मश्राद्धादितस्यसूतकेपरित्यागोन
राहुनिमित्तकस्मार्तस्येत्यर्थः। श्रौतेपिन हिंस्यात्सर्वाभूतानीति। नि
षिद्धस्यप्रतिप्रसवोग्नीषोमीयंपशुमालभतेयायव्यंश्वेतमालभ
तेति। पर्युदस्तप्रतिप्रसवोयथा। अदृसोमेश्वरंभतेनप्रथमयज्ञेप्रवृ

ऽपादियस्यपर्युदासस्यानस्यातिप्रसवोग्निष्टोमे प्रवृणक्तीति नियमवि
धिव्यावर्तितप्रतिप्रसवोयथा। घृतेरेव। त्विज्यंकर्तव्यमितिवरणानियमे
नावृतव्यावृतोसव्यावृतसमिधेनीरन्याहेतिहोतुरवृतस्यापिप्रति साम२
प्रसवः परिसंख्यंव्यावर्तितप्रसवोयथा॥ दशमेयासोरेकहविष्टमि
त्यतउत्तरेधिकरणेदद्यस्याग्रेवद्यतीयादोपरिसंख्यातियथा। सूत्रंभा
ष्यकृतोमतंभदृसोमेश्वरेणतुपशुसोमाधिकरणेतदधिकरणंथिए

वचार्णितः एकादशयेपशोरयदनानीतिपरिसंख्या। अत्रसेषागांत
रागियोगेव्यावर्तितानीति तद्द्वारा स्विष्टकृत्यापि शेषकार्येव्यावर्तितान्ये
वातत्रांगेस्विष्टकृतं यजतीसंगांतरे पुत्रयाणाप्रतिप्रसक्त कृत्यार्थेभ्य
नुज्ञाविधिर्यथा। यदिसोमेविक्रयीप्रतिविनेदतपृषतेनंवरात्रकांडेना
वक्षाणंनाशयेर्युर्लकुटैर्घ्नंतीयेकेनियवदेकेनधंसमामनंतीयापस्तंबसु
त्रे। पुरुषार्थेभ्यनुज्ञानविधिर्यथा क्रीतराजकोभाडपान्नइति। पुनर्भ्य

नुज्ञाविधिर्द्विविधः। कुतोप्यावृतंयतद्विषयः। कुतोपिव्यावृतंयतद्वि
षयश्च। तत्राद्योयथाषतुकर्मणामस्पत्रीणिकर्माणिजीविका। याजनाध्या
पनेचैवविशुद्धाच्चप्रतिग्रहइति। द्वितीयःपंचविधः निषिद्धविषयः प
र्युदस्तविषयोनियमव्यावर्तितविषयः। परिसंख्याव्यावर्तितविषयउपसं
हारव्यावर्तितविषयश्चेति॥ तत्राद्योद्विविधः सामान्यरूपोविशेषरूप
श्च। अद्योयथामनुक्तोनदिवसेस्नानमश्नीयादिति निषिद्धजीविता
सयमापन्नो। योब्नमत्तियतस्ततः आकराइवपंकेनलसपापेनलिप्यतइ

ति। द्वितीयो यथा कीतराजकौ भोज्यौ इति। उभयश्च प्रयोजनमल्प
दोषत्वं निर्दोषत्वं चेत्युक्तं वार्तिके॥ सामान्येनाभ्यनुज्ञाविधिरपि द्विवि
धः। सामान्यरूपो विशेषश्च विशिष्यते। विशेषो यं तनिर्दिष्टतरक्रिये
ति। एवं पर्युदस्ताभ्यनुज्ञाविधिरपि द्विविधः सामान्यरूपो विशेषरूपश्च
तत्राद्यो यथा। नदीक्षितस्याव्रतमश्नीयादित्यस्य पर्युदासस्य पक्षे श्रीषोमी
येसाक्षितेयजमानस्य गृहेऽशितव्यमिति। द्वितीयो यथा। ऐतरेयिब्रा
ह्मणे आशितव्यं वपायां हुतायामिति। उभयोश्च प्रयोजनं बहुल्पफलत्वं

पर्युदासविधेरयाङ्भट्टसोमश्वरः। नियमविधिव्यावर्तिताभ्यनुज्ञार्यथा
विधिर्यथा विप्रो दर्द्दुरार्जनोपायनियमेव्यावर्तितास्त्रियादिवृत्तिरापदि
अभ्यनुज्ञायते अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा। जीवेत्क्ष
त्रियधर्मेणेति परिसंख्याव्यावर्तिताभ्यनुज्ञाविधिर्यथा पंचपचनस्याभ
क्ष्याइत्यनेन व्यावर्तितानां मार्जारादीनामभ्यनुज्ञाविधिः प्राणात्यय
इत्यादिः। उपसंहारव्यावर्तितविषयोभ्यनुज्ञाविधिर्यथा। भूमसूर्या भवसूर्या

ब्राम्हणोभिक्षेतेतिसामान्यविधरूपसंहारेणब्राम्हणेषुचरेद्भैक्षमि
त्येनेनव्यावर्तितस्यक्षत्रियादेरेभ्यनुज्ञाविधिश्चतुर्वर्ण्यंचरेद्भैक्षमि
ति।क्रत्वर्थउपसंहारविधिर्यथाग्नेयंचतुर्धाकरोतीतिपुरुषार्थःस
यथाब्रम्हहाद्वादशाहानीतिसामान्यंपूर्वयोर्वर्णयोर्वेदाध्यायिनंह्यवे
तिविशेषेउपसंह्रियते।पुनरप्युपसंहारोद्विविधः।उपसंहार्येस्पर्शो
संहारविषयेनियमतःप्राप्तवानियमतःप्राप्तावितिआद्यादाहरणान्यु

डाक्टर भाऊदाजी दाजी स्मारकम्
DR. BHAU DAJI MEMORIAL

क्तान्येवद्वितीयोदाहरणंतुयजुर्युक्तंरथमध्वर्यवेदद्यादितीति।दशमोहिप्रा
कशावयजुर्युक्तरथोप्यध्वर्युभागस्यानिवर्तकइतिपूर्वपक्षंकृत्वाप्राक
शावपूर्वेविधीयमनोयुक्तंयदध्वर्युभागंबाधतेद्वडतुसप्तमप्रयोक्त
स्यापिप्राप्तमेवदानंसत्वध्वर्यवेन्यस्मैवादातव्यःप्राप्तोध्वर्यावुपसंह्रि
येतासिद्धेतोक्रत्वर्थेव्यवस्थाविधिर्यथोवाचश्रीपौर्णमास्यांमनुष्येतेवृ
धन्वतीअमवास्यामिति।चतुर्दशीपौर्णमासीमभिमृशेशंचहो

डाक्टर भाऊदाजी दाजी स्मारकम्
DR. BHAU DAJI MEMORIAL

त्रामावास्यामिति। चपुरुषार्थो व्यवस्था विधिर्यथा क्षयाहे पार्वणे कोटि
ष्टव्यावस्था विधिः। पुनः व्यवस्था विधिः त्रिविधउभयप्राप्तावन्यतरप्रा
प्तौचेति। आद्यो यथा धात्रीवृधन्वयोः आऽपभागक्रमेपट्टा लिंगाद्यो
भयप्राप्तेः। द्वितीयो यथा चतुर्होत्रपंचहोतृमंत्रयोः तयोः प्रकरणेना
नाम्नानात्। यथा वाद्वग्नये चप्रजापतये चसायंजुहोति सूर्याय चप्र
जापतये चप्रातरिति श्राद्धेनदेवताविधिपक्षेग्निसूर्ययोरप्राप्तेः तृती

योमथा यसिष्टनांनाराशंसो द्वितीयप्रयाजस्त्वनूनपादन्ये षामिति। अ
त्रहिविधिपाठक्रमस्त्वनूनपादेव द्वितीयप्राप्तो नना राशंसः तथा यद्रथं
तरसमासो मस्यादेद्वायथा मानूग्रहनग्रहीयाद्यद्रिबृहत्समाश्चुक
मानिति। अत्रापि हिपाठपाठतऐद्वायंयग्नेवप्राप्तानश्चुक्रमानिति। पुन
र्व्यवस्था कर्तृतो याद्वैविध्याद्विविधो व्यवस्था विधिर्न्यायसम्प। व्यावस्था
वचनिकिचानत्राद्यथथो सोमयवनाद्यातारिराज्यो षधयोः। चवनिकीतु

व्यवस्थासप्तधातेन सप्तविधस्तद्विधिः दशतोव्यवस्था कालतोव्यवस्था
कर्तृतोव्यवस्था संस्कार्यतोव्यवस्था कर्मतोव्यवस्था सप्तधातेन फल
तोव्यवस्था निमित्ततोव्यवस्थेति। दशतोव्यवस्था यथा वरुणप्रघासेषु उ
त्तरे विष्टारे ध्वर्युरष्टौ हविष्यासादयति मारुतीमेव प्रतिप्रस्थाता दक्षिण
मिति। स्मार्तमुदाहरणं यथा नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तं को
कुलीरे संस्थिते भानौ वुपाकुर्यात्तु दक्षिण इति बृहस्पतिः कालतोव्यवस्था

यथा वसंते ब्राह्मणोग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यो वर्षासु रथका
र आदध्यादिति। स्मार्तमुदाहरणं यथा दिनसंध्यासु कर्णस्थब्रह्मसूत्रउ
दङ्मुखः। कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुख इति कर्तृतोव्यवस्था यथा
पयोघृतं ब्राह्मणस्य यवागू राजन्यस्य भिक्षा वैश्यस्येति। तथा चार्द्धिरं ब्राह्म
णस्य त्र्यहमाममकुर्यात्यथुरश्मं राजन्यस्य रायो वाजीयं वैश्यस्येति। तथा
युवं हि स्थो वर्षतीइति द्वयोर्यजमानयोः प्रतिपदं कुर्यादिते अस्मा मिंद

वइति चतुर्भ्यो यजमानेभ्य इति। स्मार्तं तु दाहरणं गर्भाष्टमेऽब्दे कुर्वीत ब्रा
ह्मणस्योपनायनं। गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशइति संस्कार्य
तोऽयवस्था यथा आज्यौषधसाम्नां यथा धर्माणां कर्मतोऽयवस्था यथार
थंतरे प्रस्तुयमाने संमीलयेद्वृहति समुद्रं मनसाध्यायेदिति। स्मार्तो
दाहरणं तु बृहस्पतिः इष्टिश्राद्धक्रतुदीक्षा सत्रानां दिमुखे वसुः नेमिति
केकालकाभोकाम्ये तु धुरिलोचनौ। पुरूरवाद्यौ चैदेवपार्थे समु

दाहृतानि यादि। मनुः पित्रेऽचरिति मित्रे वंवाच्यं गोष्ठे तु सुश्रुतं संप
न्नमित्यामुदयेदेवे राचितमिय पीतिफलतोऽयवस्था यथा मृन्मयेन प्रति
ष्ठाकामस्य प्रणयेत् कांस्येन ब्रह्मवर्चसकामस्य स्मार्तो दाहरणं तु ब्रह्म
यज्ञ एव फलं विशेषार्थमिष्टप्रसामाध्ययनविधिः निमित्ततोऽयवस्था
यथा। यादिरथं समासोमास्यादेद्वा यथायानं ग्रहानगृह्णियाद्यदि बृ
हस्पामाशुक्रायानि तिस्मार्तो दाहरणं तु नृणामकृतचूडानामशुद्धिनी

शिकास्मृता। निवृत्तचुडकानांतु त्रिरात्राछुद्धिरिष्यते इति मनुः तथाप्रात
रकोटिव्यवस्थाकोयंतरस्यार्थिकीव्यवस्थाभवति सापिभावविषयाभा
वाभावविषयचेति द्विविधा। यथा यथा पूर्वेफ्रमावास्यायांवेदिकरणी
यमावास्यायांपूर्वेफ्रर्वेदिकरणेव्यवस्थापितेर्थोद्वेदकृत्वा वेदिकरणी
युतरेफ्रकर्त्तव्यंवदकारणपौर्णमास्यांव्यवस्थितंभवति यथाअग्ने
योवैश्राम्णोदेवतायासासोमेनेष्टाग्नीषोमीयोभवतियदेवादःपौर्ण

द्वितीया

मासंहविस्तर्ह्यनुनिर्वपेत्तेहिसउभयदेवतोभवतीयाग्नीषोमीयपुरो
डाशोकृतसोमयागपुंविषयत्वेनेव्यवस्थापितेऽर्थात्तदभावेऽकृतसो
मयागपुंविषयत्वेनव्यवस्थितोभवति। तदिदमुदाहरणद्वयंपंचमेसि
द्धतथा पूर्वमित्यत्रपूर्वउत्कर्षद्वाम्रणस्येयत्रोत्तरेकृत्वर्थःपर्युदासवि
धिर्यथा। यजतिषुयेयजामहंकरोतिनानुयाजेष्विति पुरुषार्थः
पर्युदासोयथाबानेक्षेतोयंतभास्यमीक्षेतोर्ध्वंत्यादिपुनःपयु

दासविधिर्द्विविधः पर्युदासस्योद्देश्यविशेषणत्वाच्च। तत्राद्येनेक्षते
सेवोदाहार्यः द्वितीयस्तु द्विविधः। पर्युदासस्योद्देश्यविशेषणत्वाद्। तत्रो
द्देश्यविशेषणत्वेनानुयाजेष्वियुदाहार्यः। विधेयविशेषणत्वाद्यथाना
र्षेयं वृणीतेनहोतारं वृणीत इति। पुनरपि वक्ष्यमाणनिषेधषोडश
त्वर्युदासोपि षोडविधः तथा हि। प्रकृतौ विकृतौ अप्रकृतिविकृत्या
त्मके च कर्मणि समानविधानः पर्युदासविधिर्नानुयजामह इति। अ

त्रि

त्र्यातिदेशिकद्वारं प्रतीक्षणात्सदृशो वै प्रजापतिर्ज्ञेयज्ञन्याय र्य
त्तद्वत्रत्रार्थिकवृद्धस्यादिस्तत्वान्पायापवादस्यसाम्यात्। एवं प्र
कृतिगतारादुपकारिपर्युदासः प्रकृतिगतारादुपकारिपर्युदासस्य अप्रकृ
तिविकृत्यात्मकं कर्मगतारादुपकारिपर्युदासः प्रकृतिगतादृष्टार्थसंनि
पातिपर्युदासः प्रकृतिगतप्रतिपत्तिव्यतिरिक्तसंनिपातिदृष्टार्थपर्युदासः
प्रकृतिगतप्रतिपत्तिपर्युदासः विकृतिगतोपदिष्टस्य पूर्वत्रात्रिविधस्य सं

निपातिनः पर्युदासास्त्रयः अप्रकृतिविकृत्यात्मकं कर्म गतो । विकृतिगता
तिदिष्टस्य पूर्वत्रस्त्रिविधस्य सनिपातिनः पर्युदासास्त्रयः अप्रकृतिविकृ
त्यात्मकं कर्म गतो पादिष्टसंनिपातिनः पूर्वत्रास्त्रिविधस्य पर्युदासास्त्रय इ
तिदृष्टा एवमुदाहरणानि यथासंभवं मृग्याणि क्रत्वर्थीभावे विधिर्यथा त्वि
ष्टकृदर्थवित्तनाशआज्या विधिर्यथैकं चिद्वतामंतरितस्य आवृ
श्यते आज्येनेतादेवताः परिसंख्यया यजेतेति । तथा अग्नाभावे तु विप्रस्य

पाणावेवोपपादयेदिति पुरुषार्थीभावे विधिर्यथा सत्रायागूर्यविश्वजिता
यजेतेति साधारण्यविधिर्द्विविधः विनियोगासाधारण्यविधिरनुष्ठानसा
धारण्यविधिश्चेति । तत्राद्यो यथा । यदातिथ्यायां बर्हिस्तदुपसदां तदग्नि
षोमीयस्येति यथा बर्हिषो बर्हिधर्माणां च वेद्यावेदिधर्माणां च विधि
रंगप्रधानसाधारणः द्वितीयो यथा उपदेशेन । अग्नीषोमीयतिदेशेन च
सवनीयानुबंध्ययोरंगभूतस्य यूपस्यानुष्ठानसाधारण्यार्थो दीक्षासु

यूपांछिनतीतिअपकर्षविधिरिति।उत्कर्षविधिर्यथा।अग्निमारुताद्यूर्ध्व
मनूयाजेश्वरंति।सएषओपवसथ्येहनीद्वेसः पशुरालभ्यतइत्यग्री
षोमीयस्यक्रयसंनिधावुत्पन्नस्यअपकर्षविधिःसाधारण्यविधिन्याति
रिक्तो।पियथातिष्ठंतंपशुंप्रजेयेतीतिपुनपिसामान्यविशेषविधी
यथाउदाहृतावेवाहवनीयपदविधी।दृष्टार्थौतुसोमफलचमसवि

प्रति धी।प्रसवविधिस्तुदाहृतोद्विविधोपिदृष्टार्थएव।दृष्टार्थस्तुप्रतिप्रसवविधि
र्यथा।पशुंसंज्ञपयतीतिअभ्यनुज्ञाविधिस्तुसर्वोपिदृष्टार्थएवंनतुदृष्ट
र्थोपीति।उपसंह्रारविधिस्तुपूर्वोक्तःक्रत्वर्थोदृष्टार्थः।पुरुषार्थस्तुपूर्वोक्तो
दृष्टार्थः।अन्यथास्थाविधिर्यथाआर्षेसख्यशिखाव्यवस्थाविस्तुप्रागु
क्तः।सर्वेर्थेप्यदृष्टार्थएवयद्यपिवार्त्रघ्नीप्रथमसोराजभागदेवताभूता
न्निसोमप्रकाशनार्थत्वात्दृष्टार्थवतथापितुल्यार्थयोर्युगलयोर्व्यवस्था

विधिरदृष्टार्थ एव। दृष्टार्थो व्यवस्था विधिर्यथा आर्षसंख्या शिरस्या व्यव
स्था विधिस्तत्संख्यार्थयुक्तं गोत्रज्ञानरूपदृष्टार्थं इत्युक्तं स्मृत्याधिकरणन्या
यसुधायां। पर्युदासाविस्तु। प्रागुक्तो द्विविधोपि पुरुषार्थः अदृष्टार्थ एवं
दृष्टार्थ एव। तत्र पर्युदासो यजतिषु ये यजामहे करोतिना नुयाजेष्विति अत्र
च यद्यपि अनूजाद्यतिरिक्तेषु यं शो न दृष्टार्थस्तथापि विधेय ये यजमहे
शयागप्रकाशकत्वेन दृष्टार्थत्वात् पर्युदासविधिर्दृष्टार्थ इत्युच्यते। अभा

वविधिस्तु पूर्वेदाहृतयोर्मध्ये क्रत्वर्थीयः सदृष्टार्थः पुरुषार्थस्त्वदृष्टार्थः पु
नरपि समान्यादिविध्येकरशकं जातिद्रव्यगुणक्रियाविषयत्वेन यथासंभवं च
तुर्द्धा। जात्यादिविषयत्वेन यथा पिण्डदेशपं। शो उभयांशो चेति जात्यादिविष
यमपि विध्येकादशकं प्रत्येकं त्रिविधमिति द्वात्रिंशदुत्तरशतं भेदा भवंति। ए
षामुदाहरणान्यन्येभ्यो ग्रंथगौरवान्नोदाहृतानि। पुनरप्यदृष्टविधौ
विधिर्धात्वर्थमात्रविधिः सगुणधात्वर्थविधिः किंचिद्दृष्टधात्वर्थविधिस्तत्रे

वाशिष्ठाधात्वर्थविधिधात्वर्थौ दृशेनान्याविधिधात्वर्थन्यायो संबंधाविधा
त्वर्थ। मुक्तेनप्रत्ययेन। न्यायोः संबंधविधिमुक्तधात्वर्थमन्ययोरेवसंबंधवि
धिश्चेति। अत्रदूषणभूषणे द्वितीयाध्यायपर्थप्रस्तावेवक्ष्यंते। पुनरपि त्रिविधो
विधिरपूर्वविधिर्नियमविधिपरिसंख्याविधिश्च। त्रिविधोप्यसौ चतुर्विध:
जातिविधिर्द्रव्यविधिर्गुणविधिः क्रियाविधिश्च। तत्रजातेरपूर्वविधिर्यथा
स्वादिरंवीर्यकामस्यूपं कुर्वीतेति द्रव्यस्यापूर्वविधिर्यथा गोदोहनेन पशुका

मस्यप्रणयेदिति। गोदोहनशब्दस्ययौगिकत्वेनद्रव्यवाचित्वात्। गुणस्या
पूर्वविधिर्यथा यस्किमेघवर्षुकः पर्जन्यः स्यान्नीचैसट्टोमिनुयादिति। क्रियाप
पूर्वविधिर्यथाग्निहोत्रंजुहोतीति। देवताविधिर्होमाधिकरणीभूताहवनीया
दिविधिश्चापूर्वविधिवाचयांतर्भूतः देवतांभागसिध्यादृष्टार्थत्वेपिविध्येकप्रमा
णत्वात्। आहवनीयादेरप्याधिकरणत्वेनदृष्टार्थत्वेपि होमविधिनाना सिसत्वे
नादृष्टार्थाग्निहोत्राविधिकरणवार्तिकेउक्तत्वात्। अतोदृष्टार्थत्वंनियमावि

विलक्षणं दीक्षितोक्तमज्ञानमुक्तमेव। तदेवं द्विविधो पूर्वविधिः पुनः सिद्धो
दृष्टार्थः अदृष्टार्थश्च। दर्शपूर्णमासविधिरपि द्वितीयचतुर्थीमिश्रयर्णाद्वितीयार्थवाद
भेदेन द्विविधः तत्राग्नेस्पुरोडाशः अर्थवादिकोऽर्थवादभेदेन बृहस्पते। अध्ययनवि
धिरप्यपूर्वविधिरदृष्टार्थश्च नह्ययनियमः सद्यर्थज्ञानस्वरूपेवास्य। क्रतुपूर्वेवा
। नाद्यः। नह्यध्ययनेनैवार्थज्ञानमिति नियमः। संभवीउपास्यांतरेणापि त
दर्शनात्। नद्वितीयः। अनारभ्याधीतेऽनन्यक्रतुपूर्वानुपस्थितेऽव्यभिचारि

DR BHAU DAJI MEMORIAL
डॉक्टर भाऊदाजी स्मारकम्

रेण हि क्रतुपस्थितिः स्यात् नचक्रतदस्तिभावेवापर्णात। दिनक्रमेगलापतिः अ
तएवाध्ययने। नियमपूर्वनास्ति श्रुत्या वृत्तांतुफलतो नियमव्यावहारक
मेतत्सर्वन्यायरत्नमालायामुक्तं पुनरप्यपूर्वविधिर्द्विविधः। क्रत्वर्थः पुरुष
र्थश्च। तत्रायो यथा समिधो यजतीत्यादि। द्वितीयो यथा अग्निहोत्रं जुहोतीत्यादि
रिति। नियमविधिस्तु त्रिविधः। प्रतिनिधि नियमः। प्रतिपत्तिविधिस्तदर्थ
यव्यतिरिक्तश्चेति प्रतिनिधियमो यावद्पूर्वविधिवद्यवआतिदेश्यगुण

DR BHAU DAJI MEMORIAL
डॉक्टर भाऊदाजी स्मारकम्

क्रियाविषयत्वेन चतुर्विधः। तत्र जातिप्रतिनिधिनियमो यथा पूर्वके विधिः
द्रव्यप्रतिनिधिनियमो यथा पष्ठ्यादिसत्रायादीक्षितानां प्रमीयेतेयोस्येनरि
क्षस्यान्तस्य स्थानेदीक्षयिष्येति। नेदिष्ठशब्दस्य युवाल्पयोः कनन्यतरस्या
मितियुवशब्दादेशानेदविधानाद्यौगिकत्वेन द्रव्यवाचित्वात्॥ यद्यपाक
पशुः पलायेतान्यं तद्वर्णं तद्वयसमितिनुकातीयं नद्रव्यस्य गुणस्य वा प्रतिनि
धिनियमः। यदा वेयशोर्दत्ताः पुनर्जायेतेअथ समर्थो भवतीति वयो

वस्था विशेषवाच्छिन्नस्य कृष्णसारगोमीषोमीयद्वारिगुणयोगिनश्च
मुख्यद्रव्यस्य प्रधानेन प्रयुक्तत्वाद्दीक्षितस्य इव वीर्यांतरणां गुणप्रतिनि
धिनियमो यथा कातीयानां कृष्णसारंगाभावे लोहितसारंगा विधिरानि
षामीयपशोर्यदि कृष्णसारंगनविंदथो अपि लोहितसारंगस्यादिति श
तपथात्। क्रियाप्रतिनिधिनियमो यथा परलंबयादियजमानः प्रसवेस
जापतेविभाव्नामलोकइतिश्रुत्यां यजमानभागपथायासमिष्टय

जुषासहजुहुयादिति अत्रहोमः प्रक्षेपमात्रं देवताभावत्। तथा हि ताग्नि
पात्रप्रतिपत्तेर्दक्षिणेहस्ते जुहुमासादयतीत्याद्ययाः प्रतिनिधिः। पतिता
हुताग्निपात्रेष्वान्नाः स्मर्यते पात्राणि तु देहदग्धो यजमाने वृथामृत इति तथा हि
जभावेश्राद्धान्नभोजनस्य प्रतिनिधिः स्मर्यते। हमाद्रौ देवलनिबन्धे यथा
भवद्भिर्नासिकेषु समाहितः। शेषानुप्रेषसंयुक्तं विधानं प्रतिपादयेत्। निर्दिष्टा
पन्नमुद्धृत्य यत्रं पात्रं ततो गतिः पात्राभावे क्षिपेदग्नौ गवेद्यादथाप्सु वेति

प्रतिनिधिनियमः सर्वः क्रत्वर्थ एव न पुरुषार्थोपीति नहि विधः। तथा प्रति
निधिनियमः सर्वोपि दृष्टार्थ एव नादृष्टार्थोपि इति नहि विधः स्त्रिविधो वेति। प्र
तिपत्तिविधिस्तु क्रियाविधिरेव न जातिद्रव्यगुणविधिरिति न चतुर्विधाः। त
था प्रतिपत्तिविधिर्द्रव्योद्देशक एव न जातिगुणक्रियोद्देशक इति नोद्देश्य
चातुर्विध्यादपि चतुर्विधः। पुनश्च प्रतिपत्तिः क्रत्वर्थैव न पुरुषार्थेति नहि वि
धस्त्रिविधः। पुनरपि प्रतिविधिर्दृष्टादृष्टोभयार्थश्च नादृष्टमात्रार्थोपीति न हि

विधातत्राद्यो यथा चत्वारि कृष्णविषाणं प्राश्नीयादिः। द्वितीयो यथा त्रि
ष्टुभ्कृद्विधिरिति। पुनश्च द्विविधा प्रतिपत्तिः। साक्षाद्विनियुक्तप्रतिपद्यविष
यासाक्षाद्विनियुक्तेतरानानुषंगसिद्धप्रतिपाद्यविषयाच तत्राद्या सा हेतोर्
द्वितीया यथा। शाकृत्यं विधत्ते इति प्रतिनिधिप्रतिनियमव्यतिरिक्तो विनि
यमविधिः प्रतिनिधिविधिवज्ज्ञाताद्विषयत्वेनताच्च चतुर्विधः। तत्र ज्ञा
तेर्नियमविधिर्यथा। क्रयाक्रय्ये गवे विगोपदृष्टवद्देवहि क्रयक्रय्या माधृ

साधिकरणवार्तिके आदृश्ये शाद्वृत्यादिति सूत्रेन्यथा। सिद्धांते उदाहृतम
म्रादृश्यस्य नियमविधिर्यथैकहायन्येति गुणस्य यथा रूप्येति। क्रियाया
यथा वीहीन यवहंतीति सोयं प्रतिनिधिप्रतिविधिव्यतिरिक्तो नियमविधिः पु
नर्द्विविधः क्रत्वर्थः पुरुषार्थश्च। अनंतरोदाहृतश्चतुर्विधः क्रत्वर्थः। पु
रुषार्थो यथा ऋतौ भार्यामुपेयादिति प्राभाकरे। ब्राह्मणं भुंजीतेति वा पुनः सो
यं नियमविधिस्त्रिविधः दृष्टार्थो दृष्टादृष्टोभयार्थश्च। तत्र पुरुषार्थ

क्रिया नियमो नैमित्तिकः सर्वेप्यृतौ भार्यामुपेयादिति दृष्टादृष्टोभयार्थः इह
हि प्रयोजकत्वेन तादर्थ्यमुच्यते नियमादृष्टस्य प्रयोजकत्वादवघातादे
र्दृष्टार्थत्वात्। प्राधान्यत्वादरेपि भोजननिरपेक्षेणादृष्टमात्रेण प्रयुक्तेरवघा
तवद्दृष्टार्थत्वात्। वागमनतुभायसुखानिच्छोरपि कुटुम्बादेः कृतो निमित्ते
अदृष्टार्थं प्रयुङ्क्तएव विधिः सुखेच्छुप्रतितूष्णीस्तइति दृष्टादृष्टोभयार्थोयं।
केवलादृष्टार्थस्तु नियमो विषयप्रिकृतौ वैकल्पिकयोर्बृहद्रथंतरयोर्

रदृष्टार्थयोरन्यतरस्य क्वचिद्विकृतौ नियमः श्रूयतेइति अपूर्वनियमवि
धिवच्च परिसंख्या शेषपरिसंख्याविधेरपि जामादि विषयेषु ग्रहणानि
मृगीणि ग्याणि। पुनः परिसंख्याविधिर्द्विविधः शेषि परिसंख्या शेषप
रिसंख्या च। आद्या यथा इमामगृभ्णन्निति द्वितीया यथा ग्रहमेधीये
पंचमपक्षे तु मदसोमेश्वरेण पशुसोमाधिकरणे शेषपरिसंख्योदाहर
णमुक्तं न्यायस्तार्थ्यवयप्राप्तावपेक्षदृशेवैपशोरवदानानीत्यस्या

नन्यप्रयोजनत्वादवयवातरपरिसंख्यार्थत्वाभ्युपगमेनदशामिकं सिद्धं
तइति। तदेतत्तस्मात्मिदर्शमे पशोरेकहविष्टमियुतेन्निमेधिकरणेदुषि
तोमिश्राहित्रस्यादिद्विरवद्यतीतिसंख्याविधिनैकवाक्यतामेवाहुः। यदि
परंदशादिवाक्यानामेवेमामग्रभाविनिवसुकलतःपरिसंख्यात्वंतत्र
भाष्यकृदुक्तं चरंतदपि विशसनेपि पशुत्वाभिज्ञानांतद्दृष्टादिवाक्यभा
वेपशोरेवमध्यासुवर्द्धिद्विसकृद्वावस्थं प्राप्नुयान्नावयवेभ्य इतिनि

रस्तं। यत्तु तत्रमिश्रैः। पशोर्विशसनेनसाधनत्वयोगात्सर्वावयवेभ्यो वस्तुत्व
तिरुक्तसापातत एवेयुस्तुतं तत्रैव। तदुक्तमाकृत्याधिकरणवार्तिकोप
न्यासे अपनीतांगेषु विशेषमुध्यभावात्सामान्यरूपेवाविशसनादिविशिष्ट
बुद्धिर्दृष्टेति। पुनः। परिसंख्या द्विविधा शाब्दी आर्थी चातत्रया निषेधरूपे
वेतिभट्टसोमेश्वरः। एवकारेण शाब्दीपरिसंख्येतिमिश्राः यथात्रीणिहवे
यज्ञस्योदराणि गायत्री बृहत्यानुष्टुप्च अत्रद्येभावपंसत एवोद्यतीति।
आर्थीतुद्विविधा प्राप्तपरिसंख्या याविशेषाऽप्राप्तपरिसंख्या च यातद्वी

नासाच फलतः परिसंख्येति गीयते यावकौतकसिद्धांते पिकसंख्यायया
तद्दीनासाव फलतः परितत्राद्याया भाष्यवार्तिकोक्तसिद्धांते उदाहरण
नास्येव पूर्वपक्षेतु ग्रहमेधीये पंचमे पक्षे सिद्धिभाष्यकारांतरमते तु सि
सिद्धांते पिकचिदंगीकृता। यथा दशमे गिरसं द्विरात्रे श्रुतयेरवानसं
पूर्वेहन्साम्नगयाति षोडस्युत्तर इति। तत्र द्विरात्रे तमाह्नानामतिरात्र
सस्थ्यात्रकृतिरात्रतः षोडाशिविकल्पे प्राप्ते उत्तरेहन्द्विरात्रस्य एव
तइति वाक्यं तेरेणानारभ्याधितेन नियतः षोडशी युत्तर इयेनना

गिरासंद्विरात्र एव परिसंख्यास्थापतेः तेन द्विरात्रांतरे विकल्प इति भाष्या
कारांतरोक्तसिद्धांतः शबरस्वामिभिस्तु परिसंख्यानांगीकृता त्रिदोषला
त्वाच्चेरवानसविधेस्त्वर्थीवादः षोडस्युत्तर इतीसांगीकृतमिति। सप्त
दशार्त्विज इत्यापिनप्राप्त परिसंख्यायथापिनवापरिसंख्यानादिति सूत्र
त्रकृतात्रपरिसंख्यात्वमेवोक्तं भाष्यकृताचतथैवव्याख्यातंतथापिवा
र्तिककृताधिकरणांतेसप्तदशश्रुतेरुपसंहारार्थतैवोक्ता। तदेतदुपपद्य
म तस्माभिःशास्त्रादीपिकाप्रकाशोक्तस्माप्राप्तपरिसंख्योदाहरणंस्मार्तमे

यपंचपंचनखा भक्ष्या इति। अभाप्तपरिसंख्योदाहरणं। इमामगृभ्णा
न्निसेव। पुनः परिसंख्या द्विविधा कृतार्थापुरुषार्था च पूर्वोक्ता विश्वो वा
न्यायोदाहरणानि। द्वितीयोदाहरणं तु स्मार्तमेव पंचपंचनखा भक्ष्या
इति। पुनः परिसंख्या द्विविधा दृष्टार्था अदृष्टार्था च तत्र इदं निरयं शः सर्व
त्राप्यदृष्टार्थ। एवं विधेयांशः केचिद्दृष्टार्थः केचिदृष्टार्थः आद्यो यथा इमा
मामगृभ्णन्न्यो च पंचनखा भक्ष्या त्री णि हवेयज्ञस्योदराणीति मंत्रभ
क्षणाद्यापोद्दापानां दृष्टार्थत्वात्। अदृष्टार्थोदाहरणं तु ग्रहमेधीये पंचमे प

पक्ष इति पुनरपि परिसंख्या द्विविधा नियमतः सा त्र चान्यत्र च प्राप्ता च
नियमतस्तत्र चान्यत्र च प्राप्तौ चेति॥ तत्राद्योदाहरणमिमामगृभ्णन्नि
त्यादिश्रौतं द्वितीयोदाहरणं तु स्मार्तं पंचपंचनखा भक्ष्या इति। पुनरपि
विधिर्न विविधः। अध्याहारेण विपरिणामेन व्यवहितकल्पनया व्य
वधारणकल्पनया गुणकल्पनया नुषंगेण यदि शब्दपरित्यागेन रुच्यथा
हारेण हेतुहेमतो हि इति। तत्र याः पंचर्थ्यादाधिकरणपूर्वपक्षे आंशेकं

मिषेणभाष्यएवोक्तो अथोच्येतअध्याहारेणवाविपरिणामेनव्यवहित
कल्पनयावाव्यवधारणकल्पनयावागुणकल्पनयावाविश्वेर्थःक
ल्पिष्यत इति। अनुषंगस्त्वनुषंगाधिकरणे सिद्धः यादिशब्दपरित्यागादय
स्तुत्रयोरर्थांतराधिकरणपूर्वपक्षे वक्ष्यधिकरण। सिद्धांतोपयोगित यथा
प्येवार्तिके वोक्तः। यादिशब्दपरित्यागोऽध्याहारकल्पनाव्यवधाने
नसंबंधोहेतुहेतुमतोश्चलिंडिति। अत्रव्यवधानेनसंबंधः पूर्वोक्तव्यव

वहितकल्पनैवा यादिशब्दश्च यच्छब्दादेरप्युपलक्षणमितिनवैवभे
स्तत्रयचतुष्टयलक्षणार्थः प्राचांसार्धश्लो। कअध्याहारोऽक्तस्तेपोव्य
त्यासोव्यवधिः परैः। मतो विपरिणामोसौप्रकृतिप्रत्ययान्यथा। भाष्यान्य
थासकरणं व्यवधारणकल्पनेति। तत्राध्याहारोदाहरणयथाविश्वजिताय
जेतेति अत्रहिचतुर्थेस्वर्गकामपदाध्याहारउक्तः। व्यवहितकल्पनायथारा
त्रिसत्राधिकरणेप्रतिष्ठेति हयायएतारात्रीरूपयंतीयत्रयेप्रतिष्ठंतितेएता

रात्रीरुपयंतीत्यन्वयकल्पनायुक्ता। विपरिणामस्योपेतदुदाहरणं प्रतितिष्ठासंति
उपेयुरितिविपरिणमोक्तेः व्यवधारणकल्पनायथावेदोपक्रमेमुख्येकृत्वाचाधियत क्रि
इत्यत्रोपसंहारेवेदविषयत्वकल्पनाद्वाक्यपारीयुक्ता। तथा च प्रतिगृहेष्वपाधि
करणेदानविषयोपक्रमबलेनयावाप्तोऽन्यान्प्रतिगृह्णीयारिसुपसंहारस्यप्रति
ग्रहेपरितिदानविषयत्वकल्पनोक्ता। नत्वाद्येव्यवधारणकल्पनोदाहरणेगु
णकल्पनेदाहरणेगुणकल्पनेवा स्तिहितीयायेप्रकृतिप्रत्ययस्यान्यतरस्या।

न्यथत्वादिपरिमाणामएवेतिकोभरः व्यवधारणकल्पनेय। यदपितल्लक्षणं
वाक्यान्यथात्वकरणमितितदपिवाक्यार्थसान्यथात्वकरणेनतत्रप्रतितिष्ठ
तीतिविपरिणामोदाहरणेप्वविरोधायतुविपरिणामव्याख्येयेवाक्येनैक
वाक्यतापन्नेनोपक्रमेणान्यथात्वंयवधारणकल्पनात्वक्षणंप्रतितिष्ठतीति
विपरिणामेतुवर्त्तमानत्वाद्वाधादुपेयुरितिवाक्याचानिमपत्वापे। क्षिविधये
कवाक्यतादेवचान्यथात्वंनैकेनचिदुपक्रमेणेयुक्यतेतदपिनफलवमसा

वाक्ये हि यादि राजान्यं वाचेश्यथा याजयद्दि युपक्रमात्तमस्मै भक्षं प्रयच्छेदिति
पसंहारेतेन यज्ञेति कल्पनाद्वाक्ये च सेषाम्यवधारण कल्पनेयुक्ते निर्विवादाव्या
वधारण कल्पना। वार्तिकेतु तदधिकरणांते एतेन पूतीकानभिषुणुयादित्यादि
निव्याख्यानीयुक्तेर्यदि सोमनविदेत पूतीकानभिषुणुयादित्यस्य मुद्राहरणतोक्ता
तद्यो गापक्रमाभावाद्व्याप्तिः स्यात्। उच्यते। यदि सोमेन विदेतेति उपक्रमादे
वतात्रापि पूतीकानां यागोसाधनताकल्पते। यागसाधनीभूतसोमोयदि न

लभ्येतेयुक्ते हि इष्टभवगम्येतेकिंचित्त्रयागसाधनंविधिसितमयेस्ती
ति अन्यथासोमालाभोतिरनर्थकेवस्यादिति। गुणकल्पनायथा। सृ
ष्टीरुपदधातिप्राणभृतउपदधातीति। पूर्वत्रासृष्टिलिंगाउत्तरत्रप्राण
भृतच्छब्दोपेतउपिमंत्रागौण्या वृत्तोक्ता विधीयंत इतितथाशेषनचितं
चिन्वीतस्वर्गकाम इतिप्रकृतावयनाश्रितश्येनसादृश्यंगुणः फलाय
विधीयतेअत्रहिकर्मणि हनइत्यतउपपदार्थकर्मणीयनुवर्तमानेकर्म

ष्पयाख्यायामितिकर्मणि षिः विधेरेपनंचीयमानमितिप्रतीतेः सा
धिकरष्योयपत्ये शेन सदृशमितिगौण्याकल्पते। पुरुषार्थोदाहरणं
तु अनुषंगण विधिस्तु द्विविधः पुरस्तादनुषंगः परस्तादनुषंगश्च। तत्राद्यो
यथायदिब्राह्मणो यजेतबार्हस्पत्यमध्ये निधाय। हुतं हुतमभिधारयेत्
यद्यदिराजन्यऐंद्र्यादिवैश्यो वैश्वदेवमित्यत्रऐंद्रवैश्वमियतः परमध्ये
निधायेत्य। द्यनुषज्यते। तदुक्तमवेक्ष्याधिकरणभार्तिके। राजन्यस्यापिश्रा

डॉक्टर भाऊदाजी दाहस्यास्मारकम्
DR. BHAU DAJI MEMORIAL

मुणवैश्यवदेकामंत्रिरणप्रयोगांतरेण। वासंबंधइत्युक्तएवंचतस्यापिम
ध्यनिधानवाक्यंतत्रप्रयोगमनुपपद्यतइति। परस्तादनुषंगो यथाऔर्ध
षऽपोतिरथंतरंविश्वऽपोतिरथंतरंसर्वऽपातिरेतेनसहस्रदक्षिणेनयजेतेयत्र
एवंतेनैसापूर्वभाक्यंत्रमेनुषज्यते।। यदिपरिस्रागेनाविधिस्तुयद्यपभा
र्तिकेयदिब्राह्मणो यजेतेयत्रउत्तरपक्षोरथापनायपूर्वपरितोषमिषेणदू
षितः परिस्रागादरमध्यादस्यपूर्णमितिमत्वा। अथवायदिरथेतेतिर्ग
यतितिमंथेनतथापियदिशब्दस्यानर्थक्यंयच्छब्दपरिस्रागोदाहरणंयत्र

डॉक्टर भाऊदाजी दाहस्यास्मारकम्
DR. BHAU DAJI MEMORIAL

न्नयोः शाकपालइत्यादेवयदि शब्दपरियागस्थानेभिषिक्तोदाहार्यं। यद्
रूपीध्मा इत्यसंभवेयदि शब्दपरियोगो न युक्तः व्यवधानेन संबंधसं
भवेरुच्यध्याहारेसंभवप्युपयुक्तः हेतुहेतुमद्भिः संभवे व्यवधानेन
संबंधोप्युपयुक्तः इति वार्तिकेयुक्तः यतो यत्र रुच्यध्याहारा व्यवहितकल्प अ
नाहेतुमद्भिः कल्पनरूपपक्षत्रयं न संभवति तच्च यदि शब्दपरिया
गे उदाहार्यं। यथा यद्यातुरस्या न्मनसा वाचा वा सन्यस्येति। अत्र हि
यदि रोचेत रथंतरसोमाः स्युरिति यद्यदि रोचेत आतुरस्या इति रुच्य

ध्याहारो न संभवत्यातुरतायाः अविधेयत्वात्। एवं व्यवधानेन संबंधो न
संभवति। सही गृह्णीयादिति लिंगेऽकामप्रवेदने कश्चित्तीयं गीकृत्य यद्ये
द्वाय वाग्रान्यद्वान्मद्धितुमिच्छेद्रथंतरासमासोमस्यक्रयइति वाय
दिमनासा वाचा वासान्यसितुमिच्छेदातुरः स्यादिति कल्पेतां न चेन संभ
वति। ऐंद्रायाग्रान्यद्वान्गृह्णीयादिति हेतुआतुरतायाः अविधेयत्वा
देव। एवं यातुरस्या इत्यत्र हेतुहेतुमतोः कल्पितपक्षेपि न संभवति। एद्वाव
यवाग्रान्यद्वान्यद्गृह्णीयादिति हेतुमत्कल्पितपक्षे हि यदि ग्रहणरूपफलस्य

हेतुरातुरःकर्यइत्यर्थोवाच्यःनचैतत्संभवतिआतुरतायाआविधेयत्वा
देव।नचहेतुलिङ्गसंभवःतदाहिरथंतरसमासोमःस्यादितिहेतौलिङ्
ग्रहाग्नृष्टीयादितिविधोवततश्चरथंतरसमासोमहेतुकंग्रहाग्रहं
कार्यमितिवदिहयद्यातुरस्यादितिलिङ्हेतौसन्यस्येतिविधौतत्रा
तुरताहेतुकःसन्यासःकार्यइत्यर्थोवाच्यःनचोसोसंभवतिसोमयागस्य
हिरोषिवाप्रायोजकत्वाख्यंहेतुकःसन्यासःकार्यइत्यर्थोवाच्यं
संभवतिनक्षातुरतायाअरोषिवादनिमित्तत्वाच्चतस्मादातुरवाक्येरु

प्यध्याहारव्यवधानसंबंधहेतुतुमाल्लिङ्पक्षणामसंभवादातुरवाक्यं
यदिशरूपरिसागस्येवासंकीर्णमुराहरणमिति।रुच्यध्याहारपक्षस्तु
यद्यपिवार्तिकेयदिब्राह्मणोयजेतेत्यत्रउत्तरपक्षोपस्थाकेस्थापनाया
पूर्वापरितोषयज्ञेनदूषितःअध्याहारादपिस्वपरवृत्तिरेवव्यवहितफल
नयात्लघीयसीधर्ममात्रावाधादितिग्रंथेनतथापियत्रलिङ्दृष्टाभावा
द्वाक्यभेदेनसंबंधकामप्रत्यवरनेचगृष्टीयादितिलिङिछंप्रयायती

तिवार्तिके कर्तृनीयः पक्षस्य हेतुमतो लिङ इति चतुर्थपक्षस्य चासंभवस्तत्र
रूप्यध्याहारः संभवत्येव। तादृशमुदाहरणं मृग्यं। व्यवहितकल्पनापक्षो
पि यारिब्राह्मणो यजेतेत्यत्र वाक्यकृताहेतुहेतुमतो लिङ इति पक्षसंभवे निराकृ
तः। विनैव व्यवहितकल्पनयाप्ययं पक्षो भवन्नलवत्तर इति मन्वानो हे
तुहेतुमतो लिङि तिउपन्यस्यती तिग्रंथेन तथापि यत्र हेतुहेतुलिङि सस्या
विषयो नास्ति प्रतिष्ठति हथा यथैतारात्री रूपयती तिलद्भ्रयागालद्वाच

हितकल्पनोदाहरणं संभवती यतः पूर्वमुदाहृतं। हेतुहेतुमतो लिङि स
त्रोदाहरणं तु यदि ब्राह्मणो यजेतेत्याद्येव तत्र हेतुकरणं हेतुमान्फलं मत्फ
पि तत्रापि विधारयं। ब्राह्मणो यजेतेति हेतौ लिङ प्रतिधारयेदिति विधावेव
तेनायमर्थो ब्राह्मणकर्तृकयागहेतुकमध्यनिधानपूर्वमभिधारणं। अभिधा
र्यमिति। न च क्रियमाणो यागो हेतुत्वं प्रतिपद्यत इत्यर्थो हि हितो भवती
ति अथवा हेतुमत्साभिधारयादिति लिङ् ब्राह्मणो यजेतेति विधावेव। अ

नुक्तमपि च यागस्य हेतुं हेतुमदाशेषास्तानिषेध्यं भविष्यति। तत्रा
यमर्थः मध्यनिधानपूर्वकहोमपूर्वकाभिधारणरूपफलहेतुभूतो ब्राह्म
णकर्तृको यागः कार्य इति प्रतिषेधो पि द्विविधः प्रयक्षः कल्प्यश्चाप्रयक्षे।
ल्पे ४ प्येनकथा वक्ष्यते। कल्प्येपि सप्तधा स्मृतिकल्पः आचारकल्पः निषेध
कल्पः अर्थवादकल्पः। मंत्रकल्पप्रायश्चित्तकल्पो दण्डकल्पा
श्चात्र स्मृतिकल्पो यथा सगोत्रानपरिणयेयादिः आचारकल्पो

यथाहरिवासरपरिभाषितेषु लेपारणानिषेधः निषेधकल्पो यथा वि
शेषनिषेधाद्विशेषणनिषेधः अर्थवादकल्पे द्विविधः स्वतंत्रवादकल्पो
विध्यंतरशेषार्थवादकल्पश्च आद्यो पि द्विविधः शेषार्थवादकल्पः सिद्ध
वत्कीर्तनार्थवादकल्पश्च। आद्यो यथा स्मार्तः मिथ्याभिशसनेशेषो द्वि
समो भूतवादिनः मि। भिशस्तदोषं च समारते मृषावादिनि। द्वितीयो
यथाग्निहोत्रप्रकरणे तस्माद्वसंजातं दशरात्रीर्नदुहतीति। आद्यं वसमनुत्

क्षीरकृशतरनंतरदशरात्रौ गोर्नदोह्येति सिद्धवत्कर्तनान्यथानुपपत्तिनि
षेधः कल्प्यते यदाग्नयोष्टाकपालो माघास्यापौर्णमास्यां चाच्युतो भक्ती
ति विधिवदिति। विध्यंतरशेषार्थवादकल्पो यथातस्मादारण्यमेवाश्नी
यादिति विधिशेषणनवाएतेमाषान्हविर्गृह्णीयनेनमाषनिषेधः क
ल्प्यते उपरिहिदेवेभ्यो धरयतीति विवदिति। मत्रकल्पोपि निषेधो। विधिः
कल्प्यते वद्विधामंत्रगतस्येवनयुक्तवत्तमानापदेशस्य निषधस्य कल्पनात्

।निषेधयुक्तवाक्यांतरकल्पनाच्चाआद्योदाहरणं मृग्यं। द्वितीयो यथा
यमोधमन्वविंदतेअप्रचेताइति। प्रायश्चित्तकल्पो यथातदाहुर्यआहि
ताग्निर्यदिसूतकान्वंप्राश्नीयात्कालतप्रायश्चित्तिरिति साग्नेयंतुमाने
ष्टाकपालपुरोडाशं निर्वपेदिति। दृढकल्पो यथाकर्मप्रदीपेयजनीये
ह्निसोमश्चेद्दारुण्यादिशिष्टश्यातेत्रव्याख्यातिभिर्दंडादयाद्विजा
तयइतिनेयंदक्षिणाक्षिगभावात्। अत्रचपूर्वदिनेव्याधनेदंडवि

धिरेवकल्पातेनतु निषेधः कल्प्यतइति। स्मृत्यादिकल्पोपिनिषेधोय
थासभवंजातिव्यक्तिगुणक्रियाविषयत्वेनचतुर्विधःतत्राद्योयथा
श्राद्धेचणकादिनिषेधः मरीचिः कुलत्थाश्चणकाः श्राद्धेनदेयाश्चैवके
दाचाइति। व्यक्तिनिषेधोयथाश्राद्धएवरोग्यादिनिषेधः याज्ञवल्क्यः
रोगीहीनातिरिक्तांगकर्णः पौनर्भवस्तथेति। रोग्यादिशब्दस्यौगिकत्वा
त्। गुणनिषेधोयथामरीचिः। कटुकानिचसर्वाणि चिरसानितथैवचेति

।। क्रियानिषेधोयथावृद्धमनुः। वस्त्रुकालेनियुक्तोवानैवगच्छेत्स्त्रियंक
चिदिति। पुनः स्मार्तादिनिषेधो। स्मार्तोयद्विविधः। कृतार्थः पुरुषार्थश्चात
त्राद्योयथा। उक्तएवचचतुर्विधः पुरुषार्थस्तु क्रियानिषेधः। स्मार्तोयथा
मनुः। सुरावैमलमन्नानांपाप्माचाहुर्मनीषिणः। तस्माद्ब्राह्मणराजन्यौवैश्य
श्चनसुरांपिबेदिति। पुनः स्मार्तोदिनिषेधोद्विविधः। अदृष्टार्थश्चापूर्वोदृष्ट
दादृतः। सर्वेप्यदृष्टार्थएवादृष्टार्थोयथाविवाहेअरागिणीमियादितु

कं विज्ञानेश्वरेण। रोगिण्यादिषु तु दृष्टा विरोधं एवेति। कृतार्थोपि स्मार्तादि
निषेधो द्विविधः। पुरुषार्थमात्रविषयकः कृतार्थमात्रविषयकश्च। आद्यो
यथाश्राद्धे मैथुनादौ मैथुनादि निषेधः द्वितीयो यथाश्राद्धे विहितस्यापि
मांसस्य निषेधः कलौ अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु। देवरा
च्च सुतोत्पत्तिं कलौ पंच विवर्जयेदिति निगमः। तथा शामित्रं चैव विषाणमि
ति। पुरुषार्थस्तु स्मार्तादि निषेध एकविध एव॥ पुरुषार्थमात्रविषयकश्च

कृतार्थमात्रविषयकश्च नास्ति चोदाहरणाभावात्। पुरुषार्थमात्रविषय
श्चेत्। पुरुषार्थमात्रविषयकनिषेधो द्विविधः। रागप्राप्तविषयकः विधि
प्राप्तविषयकश्च आद्यो यथोदाहृतो मानवासुरानिषेधः। द्वितीयो य
थाष्टे। तस्या यावदुक्तमित्याधिकरणे। स्त्रियाअध्ययननिषेध इति। प्रस
क्तो निषेधः। श्रौतः सोपि चतुर्विधः। जातिनिषेधो व्यक्तिनिषेधो गुणनि
षेधः क्रियानिषेधश्चेति तत्र जातिनिषेधो यथा तस्माद्ब्राह्मणो राजन्यं न नेद

यामिति। व्याप्तिः निषेधः श्रौतो यथा नासोमयाजी सञ्जयेदिति। असोमया
जिपदस्य यौगिकत्वात्। कर्तृनिषेधएवचायं न क्रियानिषेधः तथा सेविहित
क्रियानिषेधात्तेवैव विकल्पसिद्धेः दशमेतदस्तमेवनयेदिति। प्रतिप्रतिप्रस
वघलेनविकल्पो निरयुक्तः स्यादिति गुणनिषेधः श्रौतो यथा षष्टेसप्त
मपादे आधाने एकादेयाद्वादशदेयाद्वा इत्यादिविधायाम्नातमपरिमितं
दद्यादिति तत्रपूर्वपक्षितमयं पूर्वोक्तः सर्वसंख्याप्रतिषेधइति। स्थितो

दाहरणतुमृग्यं। क्रियानिषेधः श्रौतो यथा। नातिरात्रेषोडशिनं गृह्णा
तीति। पुनः श्रौतो निषेधो द्विविधः क्रत्वर्थः पुरुषार्थश्च। तत्रपूर्वोदितश्च
तुर्विधोपि क्रत्वर्थः पुरुषार्थास्तुजातिद्रव्यगुणनिषेधाः श्रौतानसंस्ये
वपुरुषार्थास्तुश्रौतः क्रियानिषेधायथा। तस्माद्ब्रह्मणः सरांनपिबेदिति।
नतुटीकायां वार्तिककृतोक्तः प्रत्यक्षश्चनिषेधसर्वोप्यदृष्टार्थस्तुवास्तु द्वि
वा। क्रत्वर्थश्चश्रौतो निषेधः द्विविधः पुरुषार्थमात्रविषयकः क्रत्वर्थमात्र

मात्रविषयकविषयश्च। अयोपि द्विविधः। रागप्राप्तविषयो विधिप्राप्त
श्च विषयः। तत्रो यो यथा। स्युपायामांसभक्षादिपुरुषार्थमपि श्रितः प्रति
षेधः क्रतौ रंगमिष्टः प्रकरण। श्रयादिति व्याकरणाधिकरणे उक्तः वि
धिप्राप्तपुरुषार्थमात्रविषयः क्रत्वर्थो निषेधो यथा दर्शितो नदृशति
न जुहोतीति तदेतदृशमेऽकं। क्रत्वर्थमात्रविषयको यथो दाहृतए
वनातिरात्रेषो शिनगृह्णाती ति क्रत्वर्थपुरुषार्थोभयविषयः क्रत्वर्थो

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

तो निषेधो यथा दर्शपूर्णमासांगंनानृतं क्रत्वर्थं वदति निषेधोपि त्रि
हि। भिर्यस्मइति संकल्पयवैर्यजेनस्पयस्त्री हि संकल्परूपमनृतं
क्रत्वर्थं प्रसाऽपते। तद्विषयो भवति भवति च पुरुषार्थरागप्राप्तानृतव
दनविषयइसापीसुकंतृतीयेऽकर्मकतुसंयुक्तंसंयोगा न्निसानुव
दः स्यादिसत्र। पुरुषार्थस्तु श्रोतनिषेध एकविध एव पुरुषार्थमात्रवि
षयकइति। क्रत्वर्थमात्रविषयकस्तु पुरुषार्थो निषेधो नास्येव उदाह

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

हवनीयाविद्ययोस्तुकृतिव्याप्यत्वेनोपादेययोरपिसतोर्विध्यंतरसिद्धये
रवोपस्थानस्यायोगाविध्यंननुष्ठाय मात्रेणयथाशक्तिन्यायाविषयत्वेऽऽ
तएवयदाहवनीयेजुहोतीयस्यानुपादेयसंबंधसाचिवोऽसंनिधिःप्रक

रणांतरमियेतन्न्यायाविषयतेष्यते। ननुयजमानस्वामीयमेकसंत्रा
हृष्यादिजातिश्चानुपादेयाचेतसंबंधसाचिवेनाप्यसंनिधिनाप्रकरणां
तरत्वाद्वेरः स्यात्। तत्रायोदाहरणंयदाहवनीयेजुहोतीयेन। जायुदा
हरणमपिमृग्यामिति। चेत्। नास्त्यालात्। जुहोतिहिसाधारणोनकंचि
द्धोमविशेषंनियमेनोपस्थापयतियदीयेतिकर्तव्यतातिदिश्येत। अ
तएवदर्विहोमाअपूर्वाइत्युक्तमष्टमे। उपेदशस्तुनास्त्येव। अनरभ्या

धीतेतुब्राह्मणोयजेतेत्यादिश्रवणे चिश्च जितायजेतेत्यादिवद्व्यक्त
योर्लिंगेनातिदेशतोरुपलाभसंभवात्करणांतरत्वकर्मभेदइष्ट
व। अतोनपचेवानुपादेयानीति नियमइति सिद्धं॥ ॥ इत्यनुपादे
यानिरूपणं॥ ॥प्रायणीयाधिकरणंतः कर्मभेदइष्टएवश्रावियस्प्रवर्ग्यं
प्रवृंजंतीति प्रवर्ग्याणांमुक्तिः तेषांचनप्रथमयज्ञे प्रवृंजादिति प्रथमप्रा
योगांगभूतोयं निषेधः तस्यचप्रतिप्रसवोयंअग्निष्टोमेप्रवृणक्तीति। तच्चे

नेचेद्द्वितीयादिप्रयोगविषयंतत्रयत्प्रवर्ग्यंप्रवृंजंतीति प्रवर्ग्योक्तिवि
धिर्नैवानुष्ठानसिद्धेः अतःप्रथमप्रयोगे निषिद्धस्यप्रतिप्रसवो द्वितीया
वार्थमिदं। अतस्तत्रविहितप्रतिषिद्धत्वादिकल्पः अतिरात्रप्रथमाह्ना
रंभकरणमेववैकल्पिकारात्रप्रथमाहरविधानेन तत्रनिषेधाति
देशादग्निष्टोमसंस्थत्वाभावेनचप्रतिप्रसवातिदेशादिति। तत्रन्या
यसुधाकृतादृपणंद्वयमुक्तंदशमेप्रतिषेधप्रदेशेनारभ्यविधानेचप्रा

स प्रतिषिद्धत्वाद्विकल्पः स्यादिसूत्रोक्तेनदुर्बलोपिविधिस्तदर्थानामलाभे
नप्रतिषेधेनतुल्यबलोभवतीतिन्यायेननप्रथमयज्ञेप्रवृंजादिसूत्रस्यप्रतिषे
धेनैवप्रवर्ग्यप्रतिषेधेनतुल्यबलोभवतीतिन्यायेनबलादेवविकल्पसि
द्धेरग्निष्टोमवाक्यनार्थक्यमित्येकोदोषः नप्रथमयज्ञइत्यस्यप्रतिषेधस्येति
द्वितीयतद्बलादेवाग्निष्टोमप्रथमयोगइवातिरात्रप्रथमाहारेपिविकल्प
एवापद्यतेनानियमकरणंसिध्येदितिद्वितीयोदोषः स्वयंतुसमाहितं।न

प्रथमयज्ञइतिनप्रतिषेधः किंतुपर्युदासोयत्प्रवर्ग्यप्रवृंजंतीतिप्रवर्ग्येति
तिवाक्यशेषःपर्युदस्तप्रतिप्रसवाग्निष्टोमवाक्यं।नन्वकर्त्तव्यत्वेनोक्त
स्यकर्त्तव्यत्वेनोक्तेःप्रतिप्रसवस्यात्पर्युदासस्यचाकर्त्तव्यत्वोक्त्यर्थलाभा
वस्यापिधीनामेकदेशःस्यादितिसूत्रेणाविकल्पायदशमेसिद्धांतयिष्य
माणत्वात्पर्युदस्तप्रतिप्रसवोनयुक्तः।अतएवाग्निष्टोमप्रथमप्रयोगे
विकल्पोप्ययुक्तः कर्त्तव्याकर्त्तव्ययोरुदासीनेनपर्युदासेनसामान्य

विधर्द्वितीयादिप्रयोगमात्राविषयत्वेनोपसंहारात्प्रथमप्रयोगे नित्यविधिना
नुष्ठानमात्रंसिध्येदितिचेत्। सप्तमन्यत्रपर्युदासोऽनेनाकर्तव्यत्वोक्त्यर्थः
तथापीहापरपंतदर्थताभ्युपेया। अन्यथाप्रथमप्रयोगे नित्यानुष्ठानमात्र
स्यपर्युदासाग्निष्टोमवाक्यद्वयसाध्यस्यानारभ्यवादेनैवसिद्धेस्तदुभया
नर्थक्यंस्यात्। नानूयाजेविधिवन्नित्यानुष्ठानेनपर्युदासस्यार्थक्येतुपु
नर्विधिर्व्यर्थःस्यात्। अतोत्रपर्युदासस्याकर्तव्यत्वोक्त्यर्थत्वायुनर्विधिना

विकल्पस्तस्यचप्रतिप्रसवेसंयुक्तमिति। यापि निषेधस्तुतिरात्रेविकल्पा
पत्तिरुक्तासापिनाप्रकृतोसामान्याधाक्यपेक्षोपभूतस्यपर्युदासस्यातिरात्रे
तिदेशात्प्राप्तेनियमकरणाद्विकल्पार्थस्यचप्रतिप्रसवस्यानातिदेशादिति।
तदेतदपिसोमवरमंतंयुक्तं। यतावदिहपर्युदासोप्यकर्तव्यत्वोक्त्यर्थइतिक
ल्पनयाप्रदृष्टामश्रुतंचकल्पितं। तन्न। एवंहितवाप्यतिरात्रप्रथमाहोरपि
विकल्पोपरिहार्यत्वोक्तंविकल्पार्थस्यप्रतिप्रसवस्यानातिदेशान्नियाक

रणमितितदपि। नाहि विल्पः प्रतिप्रसवस्यान्यार्थ एव किंतु पर्युदा
सस्य। कर्त्तव्यतातात्पर्यकतया निर्णीतार्थस्यैव पर्युदासस्यातिदेशो
रात्रयोजनंतत्र श्रवात्पर्यग्राहकस्यानतिदेशोपितेनाकर्त्तव्यतेव
गृहीतातात्पर्यकतया निर्णीतार्थस्यैव पर्युदासस्यातिदेशादेकस्य चतस्र
प्रकृतावकर्त्तव्यतेतात्पर्ये विकृतौ तु नेति परस्य परविद्वाने कार्थश्रा
योगाद्विकृतावप्यकर्त्तव्यतोक्तार्थश्रादतिरात्रेपि विकल्पप्रसंगस्य

DR. BHAU DAJI
डाक्टर भाऊदाजी इस्टीट्यूट स्मारक
MEMORIAL

वापि दुपरिहारः निर्णीतिचेत्तन्न एकधाधिकरणे। यस्तु प्रकृतावन्यार्थप
रत्वेन निर्णीतस्य शास्त्रस्याविकृतावतिदेशान्यार्थपरतानन्यायेतिनेव
पर्युदासस्याकर्त्तव्यतोक्तार्थत्वेतिरात्रप्रथमाह्नरपि विकल्पापत्तिरप
रिहार्या। इतरपर्युदासवदकर्त्तव्यतोक्तार्थत्वाभावेश्वाग्निष्टोमप्रथ
माप्रयोगे नियानुष्ठानापत्तेर्विकल्पासिद्धिरिति उभयतः पाशारज्जु
अग्निष्टोमवाक्यापातिश्रस्यारिति। नन्वेवं भद्रसोमश्चमत्तदूषणे

पिवार्तिककृन्मते तदुक्तं दूषणद्वयं कथमुद्धर्त्तव्यमिति चेत्। अत्र श्रुत्य
नप्रथमयज्ञइति निषेधएव तस्य चेष्टेष्टक्रियाविषयत्वाद्विकल्पः सि
द्ध एव नत्वसावग्निष्टोमवाक्यलभ्यः। एवमपि अग्निष्टोमवाक्यान
र्थक्यं तादृशश्च विकल्पो रात्रिप्रसङ्गेपेति भट्टसोमेश्वरोक्तं दूषणद्वयं
यमेव परिहर्त्तव्यं अग्निष्टोमवाक्यविकल्पपरिसंख्यार्थं भवत्येव
अकर्त्तव्यत्वेन बुद्धस्य कर्त्तव्यत्वनोधात्। नच प्रतिप्रसवत्वं परिसं

ख्यात्वं च विरुद्धं। यद्वा परिसंख्यैव प्रतिप्रसवशब्देन पूर्वोक्तसादृश्यो
द्बोध्यते न तु विकल्पपरिसंख्या रात्रेन नानुष्ठानमात्रेण। किंचेयन
नुष्ठानमेव न सिध्येदिति चेत्। मैवं नह्यत्र विकल्पपरिसंख्या शास्त्री
किंतु अग्निष्टोमएव प्रवृणक्ति नातिरात्र इति प्रवर्त्यानुष्ठानपरिसं
ख्याद्वारा अवधीयते रात्रेर्नियानुष्ठानसिद्धिः। एवं विकल्पपरिसंख्या
रीतिः क्वापि दृष्टेति श्रूयाद्यदि श्रूयाद् अकर्त्तव्यत्वोत्तरार्थं पर्युदासरी

ति वाचिकदृष्टेति। अथ सा चैव कल्पते ततः पूर्वापि त्रैव कल्पत इति तु
ल्यौपर्यनुयोगपरिहारो। न चाग्निष्टोमे एव प्रवृणक्ति नान्यत्रेति परिसंख्या
यामतिरात्रद्वितीयादिप्रयोगे वापि विकृत्यंतरे च सर्वत्रैव प्रवर्ग्येनिस्या
त्। तत्र चैकल्पिकप्रवर्ग्यमात्रपरिसंख्यायां सयामतिरात्रप्रथमाहारे
प्यस्यैव प्रवर्ग्यस्य पाक्षिकत्वात् परिसंख्यास्यान्नतु वैकल्पिकप्रव
र्ग्यमात्रपरिसंख्यायामेव प्रमाणमस्तीति चेत्। उच्यते। लाघवात्तद्वि

षयता लभ्यते। अग्निष्टोमे एव प्रवृणक्ति नान्यत्रेति हि परिसंख्याया
न्यत्र प्रवर्ग्यनिवृत्तिर्बोध्यमानायत्रातिरात्रप्रथमाहारे विकल्पातिदेशा
त्पाक्षिकप्रवर्ग्यनिवृत्तिः प्रसक्ता तत्रैव पक्षांतरेपि सा चेद्बोध्यते ततो
लाघवं भवति यत्र तु तिरात्रद्वितीयादिप्रयोगे विकृत्यंतरे च प्रवर्ग्यनि
वृत्तिः पक्षेपि न प्रसक्ता तत्र चेत् परिसंख्यया सा बोध्यते तत्रायं तु गौरवं
स्यात्। यथा नियमविधिरवघातदेरव्याप्तिपक्षमेव पूरयति प्राप्ति प

सेतूदास्सेएवमियमापिपरीरिसख्यायत्रप्रवर्त्यतिवृतेप्रतिपक्षंपूरय
न्प्रवर्त्तिएवंव्रीहिभिर्यजेतेतिनियमविधिरपिआग्नेयादिष्वेवव्रीहि
प्राप्तिपक्षंपूरयतिनोपांशुयाजादौतत्रानुप्रातिशिष्टस्यापिवाक्य
सामान्यविहितस्यापि ग्रौवस्यप्राप्तेःपक्षेपिव्रीहीणामप्राप्तेःल
घवाच्चविशेषप्रवृत्तस्यापिवाक्यस्यविशेषपरतादृशमेउक्ताय
थावायव्येपाशोहिरण्यगर्भःसमवर्त्तताग्रइत्याधारमाधारयती

तिश्रुतमुत्तरेजोहवाघारएवनिवेशःतत्रैवैद्रऊध्वेनिधरइति
प्राकृतमंत्रजन्यनियमादृष्टकल्पेलाघवात्पूर्वाघारेतुतत्कल्पनापत्ते
र्गौरवादिति।नन्वेवमप्येषाप्राप्तपरिसंख्यासाचत्रैदोष्यपरिहा
रसंभवात्क्वचिदप्यनंगीकृतेतिचेन्नान।अस्यापिवस्तुतोप्रा
प्तपरिसंख्यात्वात्।यथाहिइमामगृभ्णन्शनामृतस्येऽयुदाहर
णेयदीयंनस्यात्ततोलिंगादिनियोजकवाक्यकल्पनायागर्दभर

रशानारोनेपिमंत्रःप्राप्नुयादस्यांतुसंख्यालिंगंकल्प्यवाक्यकल्पे
नैवप्रतिबध्यतेएवमत्रापियद्यग्निष्टोमेप्रवृणक्तीतिपरिसंख्या।
नस्यात्ततोतिरात्रप्रथमाह्नारेविकल्पोसिद्धियेतुयत्रवर्ग्यप्रवृ
ज्जंतिनप्रथमयज्ञेप्रवृज्यारिष्यनयोरतिरेशअस्यांतुसंख्यामतिरे
शप्रतिबंधान्नातिरात्रप्रथमाह्नारेविकल्पोभवतीतिसर्वंनिरवद्यं॥
॥परीपाकाच्छस्त्रेयदुरिमहोवार्तिककृतातद्ज्ञानात्सोमेश्वर

इह्यहुपूर्वपक्षयति।तद्दूष्याहंस्वांप्रकृतिमनयंवार्तिकमतंतद
ज्ञात्वादूष्यांनविबुधजनैर्द्वैविमुखैः॥ ॥इतिप्रवर्ग्याधिकरण
पर्णाद्वारा॥ ॥वाक्यपादासेपूषाप्रपिभागभागइसत्रानारसि
ट्टुंतिनंभउपत इतिभागइतिव्युत्पत्यालक्ष्यंस्वीकार्यंचाभागशब्दार्थ
पूषणश्चदेवताधिकरणन्यायेनदेवताविग्रहादिपचकनिरासेम
भक्षयितृत्वस्वीकर्तृत्वासंभवात्तदुद्देशेनयोऽर्थभागशब्देनल

क्ष्पतो तद्रूपं देवतानि क्लानेवपेषणस्यप्रयोजिका। उपादानं
चयागस्यभागशेष्टेन विद्यते। मुख्यार्थासंभवाद्यागलिलक्ष्यापि
षयात्रा हि श्रुयते भागशेषीयानानुपादानमस्यतइति। तत्रचोद
यंतिकेवलपूषोद्देशेनप्रापिष्टानविधेयाजुहुयात्पूषः कथय
भिचारा भावेनायोगात्अतोवश्यंयागविशिष्टपुषोद्देशेनपूषवि
शिष्टयागोद्देशेनवाप्रापिष्टताविधेयातत्रचाविशिष्टानुवादोषः

तथानपरंसएवाकिंतुअंगेः स्विष्टकृतंयजतिवषट्कर्तुःप्रथमभ
क्षइतीदाविवेकस्मिन्समासपदेउत्तरपदार्थोद्देशात्पूर्वपदार्थवि
धेश्चैकप्रसरत्वाभावात्समासविधावोपिस्यात्। नचयदग्नेयप्र
जापतयेचसायंजुहोतीत्यादौक्षौमेवस्तनावभिमार्ष्टीतिमिश्रत्व
चयथासायमानुवादेनवसनानुवादेनचदेवतायाःक्षौमस्यचवि
धौप्रकरणप्राप्तयोजुहोत्याधानयोरनुवादाद्विशिष्टानुवादोषपरि

हार एवं पूषवाक्येऽपि सम्भवति अप्रकरणाधीतत्वात्। तस्माद्विद्विशिष्ट
गुणादकृतत्वाक्यभेदस्य कः परिहार इति। अत्र ब्रूमः यथा लोहितो
ष्णीषान् बिभ्रतः प्रचरन्तीत्युष्णीषगतमेव लोहितं क्रियाविशेषउद्दिश्य वि
धीयते अन्यथा गोरिकादिनासाक्षादेव विशेषणं लोहितकरणं प्रसज्य
ते तस्मात्तोपतापविशिष्टार्थविधौ वाक्यभेदश्च नास्ति लोहितमात्र
परश्चाविधिर्भवति उष्णीषिणः प्रचरन्तीति प्रकृतितउष्णीषप्राप्तेः य

थावा एकं समाकृत्य क्रियते स्तोत्रीयामित्यत्रापि स्तोत्रोद्देशेन क्रियात
मेवात्रिवं विधीयते। अन्यथा स्तोत्र एव त्रित्वं विधापते स्तोत्राणि
क्रियेरन्नायद्यपि च स्तोत्राणामुपात्तावेकत्वं निर्धारितं तथाप्याभ्यासा
देव त्रित्वं संख्यासंपाद्यते। स्तोत्राकृतिश्च नगधितिं विनोपपद्य
त इत्यृगाकृतिरेव स्यान्नतिस्त्वत्र ऋचः तस्मात्यादृशीत्रऋगाता त्रित्वसं
ख्यासमासाप्रतीयते। तादृशेव विधीयते संख्यामात्रपरश्च विधि

र्भवति। एवं पूषवाक्येपि भागरूपउपंहविरिति यावत्ततश्चसम
सावगतंहविगतमेवपेषणंपूषोद्देशेनविधिर्भ तिरो विकेपूष्णि प
क्रतुंविनाविद्यमानत्वामावाच्छक्यंनविधातुकर्तुंकिंतुदेवताभूतं
पवेतिपूष्णोदेवतात्वाक्षेपेणदेवताभूतएवपूष्णिपषणंविधीय
तइतिनाविशिष्टानुवादोषोनचसमावेरूप्यदोष इतिसर्वंसु
स्थं॥॥इतिपूषाधिक॰ पंसिद्धांतो पेषपरिहारः॥ ॥ ॥

DR BHAU DAJI
डॉक्टर भाऊदाजी इंस्टीट्यूट लायब्रेरी

इहक्वचिद्विशिष्टस्यतादर्थ्येविशेषणस्यापितादर्थ्यंभवतियथानिर्मथ्येनेष्टकाःपचं
तीतिमंथनस्यापिपाकांगत्वं॥ एवंदशापवित्रेणग्रहंसमार्ष्टीत्यादावपि॥ क्वचिद्विशि
ष्टस्यतादर्थ्येपिनविशेषणतादर्थ्यंसंमतंयथाप्रिक्रमणस्यप्रयाजद्रव्यदेवतामंत्र
णांचप्रयाजमात्रांगत्वेपिनदर्शांगत्वं॥ एवमवघातांगमंत्रोखरवलमुसलतत्पोक्षण
देरवघातमात्रांगत्वंनिर्वापांगमंत्रश्रूर्पादेश्चनिर्वापमात्रांगत्वंनदर्शांगत्वमिति॥
तत्रकिंवैषम्यबीजं॥ तथेहक्वचिद्विशिष्टंप्रतितादर्थ्येविशेषणंप्रतितादर्थ्यमिष्यतेयथा

वधानस्यदर्शापूर्वसाधनीभूतेषुव्रीहिविनियोगादृर्शापूर्वांगतापि॥ क्वचित्तुविशि
ष्टंप्रत्यपितादर्थ्यंविशेषणंप्रतिनतादर्थ्यमिष्यतेयथार्थज्ञानंप्रतिस्वाध्यायस्याध्यय
नस्यवातादर्थ्येपिनविशेषणमर्थकर्मप्रतितादर्थमिष्यते॥एवमष्टवर्षंब्राम्हण
मुपनयीततत्रेपयसिदध्यानयतीत्यपनयनदध्यानयनयोःक्रमेणाष्टवर्षवि
शिष्टंब्राम्हणंप्रतितापविशिष्टंपयश्चप्रतितादर्थ्येपिनविशेषणीभूताष्टसंख्यावि
शिष्टवर्षाणिप्रत्यपनयनस्यतापंचप्रतिदध्यानयनस्यतादर्थ्यमिष्यते॥तत्रापि

किंवैषम्यबीजमिति॥ अत्रब्रूमःऐंद्रीदशापवित्रयोर्वाक्यीयसंयोगाद्गार्हपत्यग्र
हार्थत्वंयथाक्रममभिहितं॥ एवंसोमस्ययागस्वरूपेआनर्थफलशेषणत्वं॥अतए
वसोमादीनांफलवभावनेतिकर्तव्यतात्वमुक्तंसप्तमाद्यादौ॥सोमस्यतुफलभावना
करणत्वमाघाराग्निहोत्राधिकरणेउक्तं॥नचकरणत्वमितिकर्त्तव्यतात्वंचैकस्यवि
रुद्धंकरणस्यैवसतोयागोपकारतयेतिकर्त्तव्यतात्वात्॥तदुक्तं॥नहितत्करणं
लोकेवेदेवाकिंचिदीदृशं॥ इतिकर्तव्यतासाध्येयस्यनानुग्रहेर्थितेति॥तस्मादेद्री

दशापवित्रसोमादीनामुपरुद्धानादिकरणकगार्हपत्यादिकर्मकाभावेनेतिकर्तव्यता
त्वाद्द्रव्यभूतगार्हपत्याद्यर्थतापिवाक्याद्यक्ता॥ अभिक्रमणप्रयाजद्रव्यदेवतामंत्रा
णांतुप्रयाजकरणभावनामात्रेतिकर्त्तव्यतात्वमर्थांतरप्रकरणादिभिर्नवाक्यीयः
संयोगोदर्शनादिभिरस्तिदर्शेतिकर्त्तव्यताकांक्षात्मकेनतुप्रकरणेनप्रयाजमात्र
स्यग्रहणमितिनवशिष्टस्यतत्राविनियोगेप्रमाणमस्तीतिनविशेषणानांदर्शांगत्व
मितिवैषम्यं॥ एवमेवावघातादेर्दर्शप्रकरणात्तदपूर्वीयव्रीह्यादौविनियोगात् न

दपूर्वांगतायुक्ता॥ अध्ययनस्यत्वर्थज्ञानांगत्वेप्यर्थभूतकर्मप्रकरणाभावान्न
तदंगतेष्टा॥ तापाष्टवर्षादेस्तुग्रहंगार्पत्यवत्कचिदिनियोगाभावेनवाक्यीयसं
योगेसत्यपिनतदंगत्वमुपनयनदध्यानयनोरितिब्राम्हत्वजातिवदुद्देश्यतावछे
दकतैवनतूद्देश्यतायेअर्थापत्तिःप्रभवतीतिवैषम्यमिति॥ नन्वेवमुद्देश्यविशे
षणविवक्षायांवाक्यभेदःस्यात्॥ सत्यमुद्देश्यतादृशायामविवक्षितमेवविशेष
णंअनंतरवाक्येनुतमध्यापयीतेत्यादौविधेयगतत्वाद्विशेषणविवक्षासिद्धिःएवं

मस्यपितापितामहोवानसोमंपिबेत्सवात्यइत्यत्रापितच्छब्देनैकेनोभयपरामर्शात्॥न
चाष्टवर्षब्राह्मणतप्तपयःप्रभृतिवदुभयविशेषणसमुच्चयएकशब्दोपादानेपिनैकस्मिन्नो
भयपरामर्शात्॥ एवंकामंतुयोनूचानःश्रोत्रियःस्यात्तस्यप्रहृज्यादित्यत्रकार्तृगामित्वा
दितिवार्तिकात्कर्तृविध्यवगतेःप्राप्तेचकर्मणिभिन्नपदोपात्तानेककर्तृविशेषणविधौ
वाक्यभेदात्तच्छब्देनैवोभयपरामर्शादुभयविधिरिति॥ ॥इतिविशेषणतादर्थ्यवि
चारः॥ ॥प्रकृतौवाद्विरुक्तत्वादित्यधिकरणेद्विरुक्तत्वदोषापत्तिःप्राप्तिकालवै

षम्यंचेतिसिद्धांतहेतुद्वयमुक्तं॥ तदन्योन्यव्यभिचारात्॥सप्तदशोवैप्रजापतिर्यज्ञेन्वा
यतइतितदधिकरणांतएववार्तिककृदुक्तेप्रत्यक्षदाहरणेप्राकृतद्वारप्रतीक्षणानपेक्षत्वा-
त्प्राप्तिकालवैषम्याभावेप्युपदेशातिदेशाभ्यांप्राप्तौद्विरुक्तताप्रसंगोस्त्येवा॥तथाफलचम-
सेसोमरसामानविध्येऽभ्यमानेविकृतित्वस्योभयवाद्यसिद्धत्वेनद्विरुक्तत्वोद्भावनायोगा-
न्नित्यविधेःप्रथमंप्रवृत्तेर्नैमित्तिकविधेस्तुपश्चात्प्रवृत्तेःप्राप्तिकालवैषम्यमस्त्येव॥तत्रनैमित्ति
कमतुल्यत्वादसमानविधानंस्यादितिसोमधर्ममानविध्याधिकरणेऽपिचनैमित्तिकःफलत्व

मसःससोमधर्माग्रहीष्यतीतत्रधर्मासाधारणाःसंतोद्विरुक्ताइत्यत्रेरन्निति ग्रंथेनसामा
नविध्येद्विरुक्तताप्राप्तिप्रसंगाभिधानंभाष्यकारीयमुपेक्ष्यमेवेति॥ ननुसप्तदशोवैप्रजा
पतिरित्यत्रद्विरुक्तप्रसंगेसतिसामानविध्यायोगात्कथंप्रत्यक्षदाहरणत्वंवार्त्तिककृतोक्तं
उच्यते॥तदर्थशास्त्रादाविवात्रानर्थक्यंपरिहारःप्रकृतौवाद्विरुक्तत्वादित्यधिकरणपूर्व द्विरुक्तता
पक्षप्रयोजनेनकार्यःपर्णतादावप्येवमेवतदुद्धारःस्फवचःअतश्चप्राप्तिकालवैषम्यमे
वात्रमुख्योहेतुःसिद्धांतसिद्धेःद्विरुक्तताप्रसंगस्त्वभ्युच्चयहेतुरेव॥अन्यथाहिसंज्ञाप्र

वस्यात्किमतिदेशाभ्युपगमेनद्विरुक्तताख्यमानर्थक्यंपरिहर्तव्यंकिंवातिदेशेनप्राप्यमा
नस्यापिपर्णतादेःपूर्वपक्षप्रयोजनरूपप्रायश्चित्तविशेषार्थत्वाभ्युपगमेनानर्थक्यंपरि
हर्तव्यमितिसंदेहएवदुःपरिहारःस्यात्अभ्युपगतोहिनत्रतत्रज्ञातशोतिदेशादिमंदर
प्रामाणांतरप्राप्यमानस्याप्यर्थस्यपुनर्विधिःप्रयोजनविशेषेणअग्नेरुक्थादौतमुक्थे-
नेत्यादिना॥ गवामयनेचाद्ययोरन्होरैंद्रवायवाग्रतावविधिनाभागधर्मत्वात्प्राप्य-
मानायाऐंद्रवायवाग्रतायाःतथातदर्थशास्त्रतायामपिलिंगात्प्राप्यमानस्यमंत्रस्य-

तथाज्योतिष्टोमादौसार्वकाम्यप्राप्तस्यस्वर्गार्थत्वस्य॥ एवमाम्नातेनार्थवादेनविधित
आस्थेयमानस्यापिप्राशस्त्यस्यएवमत्रापि॥तस्मात्प्रातिकालवैषम्यमेवसंशयापनय
योग्यंप्रकृतौवाद्विरुक्तत्वादित्यत्रेतिनिष्कर्षः अथैतदधिकरणप्रयोजनंनसंज्ञेयमित्य
नाभिधीयते॥यद्यपिकोर्थःसमानविध्येवेहुणकामप्रवर्त्तनमित्यन्यत्रोक्तंतथापित
च्चयनादिक्रियायामेवयुज्यतेतदाश्रितगुणकामसंभवात्॥ पर्णत्वादिज्ञातेस्वक्रिया
त्वेनतदाश्रितगुणकामोनसंभवतितरांवाच्यं॥ अतःप्रयोजनांतरंवाच्यं॥तदुच्यते॥

क्यपादाद्येउच्चैर्ऋचाक्रियतइत्यादिस्वरस्ययद्यृक्तोयज्ञआतिमियाद्भूःस्वाहेतिगा
र्हपत्येजुहुयादित्यादिनैमित्तिकप्रायश्चित्तस्यचवेदधर्मत्वमुक्तं॥ततोद्वितीयाधि
करणेउत्पत्तिवेदसंबंधनमिदमुभयमितिपूर्वपक्षितेसिद्धांतितंविनियोगविधि
निबंधनमुभयंऋग्वेदादिनामद्विनियुज्यतेतत्रोच्चैस्त्वादितस्यैवबाधेप्रायश्चित्तमि
ति॥ ततश्चयाजुर्वैदिकाज्योतिष्टोमात्तद्विकृतौसामवैदिकेश्येनेयादीक्षणीयादीष्ट
यःस्वांगविशिष्टाअतिदिष्टातास्वपियाजुहुस्तत्रापिपर्णतापूर्वपक्षेयाजुर्वैदिकविधिनि

युक्तेतिसद्वेषेयाजुर्वेदिकांगत्वेषप्रायश्चित्तंकार्यंसिद्धांतेतुनस्याःप्रकृतौयाजुर्वेदि
कविधिविनियुक्तत्वेपिश्येनेसामवैदिकाद्वितिदेशेविनियुक्तत्वात्सामवैदिकांगत्वेष
प्रायश्चित्तंकार्यंसिद्धांतेतदादीनामनाम्नानाद्मंत्रत्वमिवातिदेशस्यावेदत्वंऽहप्र
वरनाम्नामंत्रत्वमित्यत्रैवेहेदमुक्तं॥ अवदानादिविधोद्रवादिपदवद्विश्वजिदादौ
फलपदवत्सौर्यादावतिदेशवदुहादेरपिश्रुतार्थापत्तिकल्पस्यअर्थाद्वाकल्पनैक-
देशत्वादिवेदेकदेशत्वोक्तेर्वेदत्वाभावात् वेदत्वाभ्युपगमेपिमंत्रोब्राह्मणमित्यत्रैवे

राथंप्रत्यक्षवेदस्यैवनकल्पस्येतिप्रसंगादुक्तमेतदाधिकरणमिति॥ ॥इतिश्रीमत्प
दवाक्यप्रमाणपारावारपारीणधुरीणमीमांसादेवतागाम्राज्यधुरंधरश्रीभट्टनारा-
यणात्मजभट्टशंकरकृतेमीमांसाबालप्रकाशेतृतीयाध्यायः॥ ॥चतुर्थेप्रयो
जकाप्रयोजकौनिरूपितौतत्रप्रयोजकोपिसप्तधा॥ अप्रयोजकोपिसप्तधा॥तथा
हि॥कश्चिदुत्पत्तेरपिप्रयोजकउपादानस्यदिपालनस्यापि॥ यथाग्नेययागामिक्षा-
यागादिर्यथाक्रममष्टाकपालामिक्षादेःकश्चित्तुत्रितयस्याप्यप्रयोजकोयथातुषोपव

पः कपालस्य नोत्पत्तेः प्रयोजको नोपादानस्य न च पालनस्य सतु पुरोडाशार्थमेवो
त्पन्नमुपात्तं पालितं च कपालं साधनत्वेन गृह्णाति॥ कश्चित्तु उत्पत्तेरप्रयोजक
उपादानपालनयोस्तु प्रयोजकः यथा शाम्यंजनं न पांसूनामुत्पत्तेः प्रयोजकं स्वत
एव तूत्पत्त्या सिद्धानां तेषां यद्ग्रहणरूपोपादानस्य प्रयोजकं पालनस्य च॥ एवं
प्रातर्दोह्या गोपि वाजिनोत्पत्तिं आश्रितपीतोत्पन्नस्यैव बोधः स्थितं दुग्धस्य दोहन
रूपमुपादानं पालनं च प्रयुंक्ते नोत्पत्तिं॥ वाजिनया गोपि वाजिनोत्पत्तेरप्रयोज

उपादानपालनयोस्तत्प्रयोजको भवत्येव कश्चिदुत्पत्तेरेव प्रयोजको नोपा-

कृदानपालनयोर्यथा शिला वाजिनोत्पत्तेः प्रयोजिका नोपादानपालनयोः एवं
स्वर्गादिफलं या गोत्पत्तेरेव प्रयोजकं न या गोपादानपालनयोः उत्पत्तिव्यतिरि
क्त या गोपादानासंभवात्॥ क्षणिकस्य च पालनासंभवात्॥ कश्चित्तूपात्तु
पादानयोर्न प्रयोजकः पालनमात्रस्य तु प्रयोजको यथा स्विष्टकृद्यागादिः शेष
स्य॥ कश्चित्तूपादानस्यैव प्रयोजको नोत्पत्तिपालनयोर्यथा ग्राव्णि सप्तमपदनिधा
नेशाम्यंजनसंस्कृतं पांसूपादानस्यैव प्रयोजकं न पांसूत्पत्तिपालनयोः एवं चैरो

नुषोपवापोहस्तोपादानस्यैवप्रयोजनकोनतदुत्पत्तेःपालनस्यवा॥ एवमाग्नेया
दियागोदेवतायाउद्देशात्मकोपादानस्यैवप्रयोजकोनदेवतोत्पत्तेस्तत्पालनस्य
वा॥ कश्चित्तूत्पत्तिपालनयोरेवप्रयोजकोनतूपादानस्ययथास्वर्गादिफलम
पूर्वस्योत्पत्तेःप्रयोजकंपालनस्यापिकर्मनाशाजरुस्यर्शादिकृतिस्वर्गानुत्पत्तेः-
ननूत्पत्तिव्यतिरिक्तंकिंचिदस्यपूर्वस्योपादानंयत्स्वर्गादिनाफलेनप्रयुज्येत-
कश्चित्तूत्पत्तिपादानयोरेवप्रयोजकोनपालनस्य॥ यथाग्नीषोमीयपिकोरेनिस्

DR. BHAU DAJI
डॉक्टर भाऊदाजी रिसर्च इन्स्टीट्यूट
MUMBAI

दपशवस्तिदीक्षितेमैत्रावरुणायदंडनंदंडोत्पत्यपादानयोःप्रयोजकंनतत्पालनस्य
पूर्ववदविद्यमानत्वात्तस्येति॥ एवंप्रयोजकोप्याद्यभेदस्यतृतीयादिभेदानांचग
णनयासप्तविधः॥ अप्रयोजकोपिद्वितीयस्यतृतीयादिभेदानांचगणनयासप्त
विधइतिसिद्धं॥ ॥पुनरपिप्रयोजकोद्विविधःकश्चित्स्वार्थंप्रयुंक्तेयथाशेषीस्व
र्गादिःशेषंयागादिकंस्वार्थंप्रयुंक्तेनपरार्थं॥कश्चित्तुपरार्थंकिंचित्प्रयुंक्तेनस्वार्थं
यथानिमित्तंजीवनभेदनादिअशेषिभूतंदर्शादिकंभेदनहोमादिकंनस्वार्थंप्रयुंक्ते

किंतुपापक्षयक्रतुपकारादिशेष्यर्थंप्रयुंक्ते॥ तदुक्तमाचार्यैः॥ तथाहोमाःप्रयुज्यंते
भेदनस्कंदनादिभिः॥ निमित्तेनचतेषांहोमानांशेषतामतेति॥ ॥अप्रयोजकोपि
पुनर्द्विविधः कश्चित्स्वांगस्याप्यप्रयोजकोयथातुषोपवापःकपालस्यस्वांगभू
तस्याप्यप्रयोजकःकश्चित्तुपरांगस्यस्वोपकारिणोप्यप्रयोजकःकथादध्यानय
नस्यबाजिनयागः॥ यथावाक्षाभ्यंजनएकहायनीयनसाध्यमपिनतस्यप्रयो
जकं॥ यथाबाशकृद्रोहितनिरसनस्विष्टकृद्यागवात्वाप्रसनयःप्रतिपाद्यस्यश

कृद्रोहितस्यशेषस्यकृष्णविषाणादेश्चाप्रयोजकाःतथाप्रसंग्यपिपशुपुरोडाशया
गादिःपश्वंगस्यप्रयाजादेःस्वपकारिणोप्यप्रयोजकः॥ ॥इतिप्रयोजकाप्रयो
जकोदनिरूपणं॥ ॥अप्रयोजकादिलक्षणंभाष्ये॥ साधारणंभवेत्तंत्रंपरार्थत्वप्रयो
जकः॥ एवमेवप्रसंगःस्याद्विद्यमानेस्वकेविधाविति॥ अस्यार्थःसाधारणंअनेकेषांयत्रप्र
योजकत्वशक्तिरस्ति॥ परार्थत्वप्रयोजकः॥ अत्रपरार्थेपरमात्मार्थइत्यर्थः॥ अन्यथा
त्रितिप्रसंगात्॥ एवमपिपुरोडाशकपालेअव्याप्तिःकपालेपुश्चपयतीतिसप्तम्यापरस्मिन्

पणद्वयकपालानांपुरोडाशकपालेनेतिवृतीयया तुषोपवापेषिनादर्थ्यात्॥ अतःपरार्थ
इत्यस्यपरमात्रप्रयुक्तइत्यर्थः॥ एवमेवप्रसंगःस्यादित्यत्रैकस्तर्ह्यप्रयोजकप्रसंग
योर्भेदइत्यतउक्तंविद्यमानेस्वकेविधाविति॥ यद्यपिषडहनयेविधिव्यपश्रुपुरोडा
शेप्रसंगोपकारिप्रयाजादेरनंगत्वात्तदंशेपुरोडाशीयोतिदेशःप्रयोगवचनश्चक्ष
प्यतेतथापिवाजिनादिविधिस्तुवाजिनाद्येवविषयीकरोतिनचतस्यतत्रप्रयोजकशक्तिर
स्तिअन्यत्तुकिंचिन्नैवासौविषयीकरोतीतिसाधारण्येनतावत्प्रयाजादिप्रयुक्तिसमर्थो

विधिरस्तिवाजिनातिवैषम्यमित्यर्थः॥ अत्रैवार्थेद्वादशाध्यायाद्यभाष्यगतस्यएतत्सूत्रे
कव्याख्यानग्रंथस्यतात्पर्यंवर्णनीयं॥॥ इतितंत्रप्रसंगांप्रयोजकलक्षणनिरूपणं
॥ चतुर्थेप्रयाजशेषाभिधारणाधिकरणेकिंचिदुच्यते॥ चतुर्जुह्वांगृह्णातिप्रयाजेभ्य
स्तदितिप्रयाजार्थंचतुर्गृहीतंवाएतद्भूतस्याधारमाघार्यत्रीनितःप्राचीनंप्रयाजान्य
जतीत्यनेनप्रयाजत्रयेउपसंहृतंतत्रजुह्वाजुहोतीतिहोमेविहितेकृत्स्नमेवहोतव्यं॥ ननु
प्रयाजशेषाभिधारणरूपप्रतिपत्त्यनुरोधेनाकृत्स्नहोमःस्यात्॥ नप्रतिपत्तीनाप्रयोजक

त्वात्॥ नचोत्पत्तिप्रयोजकत्वमेवतासांनास्तिधारणप्रयोजकत्वंतुतासामस्तिनिवाच्यं
अधिकरणचतुष्टयविरोधात्॥ तथाहि ऽसोमेऽवचनाद्रक्षोनविद्यतेइतिपूर्वपक्षितेग्र
हैर्जुहोतिचमसैर्जुहोतीतिसर्वहोमप्राप्तेपिअलंजुहोतीतिवचनेनसिध्दांतितंतद्विरुध्येत
अकृष्टहोमस्यन्यायप्राप्तत्वेत्रवाक्यस्यविधित्वायोगात्॥ तथाआज्याच्चसर्वसंयो
गादित्यत्रचतुर्गृहीतंजुहोतीतिध्रौवाज्याद्गृहीतेनचतुर्गृहीतेनोपांशुयाजेकृतेपि
शेषकार्यानुरोधेनशेषःस्वीक्रियतेतितदधिकरणविरोधः॥ एवंसाकंप्रस्थायीयेस्वि

ष्टकृदिडंचतद्वत्॥ सौत्रामण्यांचग्रहेष्वित्यनयोरप्यधिकरणयोःसिध्दांतौप्रत्युद्ध
तौस्यातां॥ किंचनकेवलंसिध्दांतविरोधएवकिंतुप्रतिपत्तीनांप्रतिपाद्यप्रयोजकत्वा
योगरूपन्यायेनयथाप्रतिपाद्योसत्तिप्रयोजकत्वाभावःसिध्यत्येवंप्रतिपाद्यस्यशास्त्र
तःकृत्स्नहोमेप्राप्तेतद्धारणाप्रयोजकत्वमपिसिध्यत्येव॥तदुक्तंसोमेवचनादित्यधिकर
णेशास्त्रदीपिकायां॥ अथशेषकार्यवशाच्छेष्येततस्तेषामपिप्रयोजकत्वाच्छेष
नाशदोषापहारादावपिहविरंतरागमःस्यादिति॥ तस्मादलंजुहोतीत्यादिवचना

भावाज्जौहवस्यप्रयाजत्रयेणकृत्स्नहोमात्प्रयाजशेषएवनास्तीतिप्रयाजशेषाभि
घारणाधिकरणमनुपपन्नं॥ अत्रब्रूमः कृत्स्नाचिंतैवेतिकैश्चिदपिग्रंथकारैरनुक्तम
पिकल्पनीयं॥ यद्वा॥ कृत्स्नहोमेशास्त्रतःप्राप्तेयदिप्रमादात्सशेषंजुहोतितत्र
यंशेषस्यप्रतिपत्तिर्विधीयतेनित्यवदाम्नानांगेनकल्पनीयं॥ प्रतिपत्तिविधिनैव
चकृत्स्नहोमाभावकृतवैगुण्यप्रतिसमाधिस्तापिनिवर्त्ततइति॥ इतिप्रयाजशेष-
अभिघारणाधिकरणसमाप्तचतुर्थाध्यायाद्यपादेसाधिकरणेऽनारभ्याधीतंचतुर्गृही

तंजुहोतीतिवाक्यंसिद्धांतसाधकत्वेनोपन्यस्तं॥ चतुर्गृहीतंजुहोतीत्यनारभ्याधीतेन
होमांगंचतुर्गृहीतंप्राप्तंतेनाष्टावुपभृतिगृह्णातिप्रयाजानुयाजेभ्यस्तदितिहोमांगभू
तग्रहणांगभूताष्टसंख्याबाधिताचतुष्टुद्वयलक्षणार्थेति॥ तदनुपपन्नं॥ चतुर्गृही
तंजुहोतीतिहिहोमानुवादेनचतुर्गृहीतंविधत्तेनचप्रयाजानुयाजयोर्होमःकेनचि
त्प्रमाणेनप्राप्तः एवमाज्यभागयोरुपांशुयाजेचहोमस्याप्राप्तिर्नचतुर्गृहीतंविधीयते
अथचतुर्गृहीतंविधीयते॥ अथचतुर्गृहीतंजुहोतीतिचतुर्गृहीतविशिष्टहोमविधि

रित्यच्यते॥ तदप्यनुपपन्नं॥ नह्यत्रदर्शमागादिकिंचिदनूदितंनवापस्यपर्णमयी
जुहुरित्यादिवत्कर्मांतरेव्यभिचारिकिंचिद्वारमनूद्यहोमविधानं॥ तेनकर्मांगतैवास्यहो
मस्यनस्यात्॥ किंतुविश्वजिदत्कल्पफलंस्वतंत्रमेवेदंहोमांतरमापद्येत॥ अथ
मतंचतुर्गृहीतमितिद्वितीयाबलात्तदनुद्यतत्संस्कारकत्वेनप्रतिपत्तिभूतोहोमोवि
धीयते॥ चतुर्गृहीतस्यहोमांगत्वेहोमोपकारकत्वमात्रमापद्येतेत्युच्यते॥ तदप्य
युक्तं॥ एवमप्यस्यानारभ्याधीतत्वाच्चतुर्गृहीतस्यभोजनादौलोकेपिसंभावान्निर्वापा

लंभनवन्नवैदिककर्मांगचतुर्गृहीतोपस्थितिरस्तीतिनास्यहोमस्यप्रयाजाद्यंगतासि
ध्येत्॥ अथचतुर्गृहीतस्यहोमांगत्वोक्तिवदनारभ्यवादोचोक्तनाद्रियतेततोस्तुनाम
कर्मांगचतुर्गृहीतोपस्थितिस्तथापियत्रचतुर्गृहीतंविहितमस्तिचतुर्जुह्वांगृह्णाति
प्रयाजोयस्तदित्यत्रतत्रैवविनैवचतुर्गृहीताक्षेपेणहोमविध्युपपत्तौनोपांशुयाजा
ज्यभागादौचतुर्गृहीताक्षेपोहोमविधिनोपपद्यते॥ शूद्रस्यविद्याक्षेपवत्कर्मभिःएते
नेदमपिनिरस्तंयथाध्ययनस्यस्वाध्यायार्थत्वविधिरेवसामर्थ्यदृष्टार्थत्वसनाथःस्वा

ध्यायस्यार्थज्ञानेविनियोगमाक्षिपतियथावाचरुमुपदधातीतिचर्वर्थोपधानविधिरेव
सामर्थ्यदृष्टार्थत्वप्रकरणसनाथश्चयनेचरुविनियोगमाक्षिपतिएवंचतुर्गृहीतार्थहोम
विधिरेवसामर्थ्यदृष्टार्थत्वप्रकरणेरुपांशुयाजाद्यर्थंगमाक्षिपतीतिअथमतं।उपांशुया
जाज्यभागादिषुपिध्रौवमेवचतुर्गृहीतमंगमस्तीतितदनूद्यैवहोमविधिरयं॥एवम
योपाहतेचतुर्गृहीतस्यानेनविध्यभावान्नाष्टत्वस्यचतुष्टद्वयलक्षणार्थतासिध्येत्
किंचैवंसतिउपांशुयाजादौध्रौवस्यैवैकदेशंसकृदेवजुहोंगृहीयात्समानयनवन्नत्व

DR BHAU DAJI MEMORIAL
डाक्टर भाऊदाजीइत्याख्यस्मारकम्

रंचतुर्गृहीतंसिध्येत्॥अथैवमेतद्दोषद्वयोद्धारोऽभिमतःऔपहतेहोमस्यैवासिद्धेर्नहि
ममनूद्यचतुर्गृहीतंविधीयतेकिंतुचतुर्गृहीतमनूद्यहोमोविधेयःतत्रचान्योन्याश्रया
पत्तिःअष्टत्वेनचतुष्टद्वयलक्षणायांसत्यांप्राप्तंचतुर्गृहीतमनूद्यहोमोविधेयःहोमवि
धौचतस्यांगत्वनिर्वाहायचतुर्गृहीतस्याक्षेपतःप्राप्तौतल्लक्षणेति॥अतःसमानयनदृष्ट
र्थत्वादेवोपाहतेहोमप्राप्तौचतुर्गृहीतविधिरित्याद्यदोषपरिहारःकिंचेत्यादिद्वितीयदो
षस्यपरिहारस्तुउपांशुयाजादौध्रौवैकदेशस्यचतुर्गृहीतत्वाभावात्॥अतस्तदनूद्यहोमवि

ध्ययोगाद्धोमानुवादेनैवचतुर्गृहीतंविध्येयमिति एतदप्ययुक्तं उपांशुयाजादौहोमा
प्राप्तेरेव किंचयदुक्तंध्रौवैकदेशस्यचतुर्गृहीतत्वाभावादिति नदपिन प्राक्तनप्रयाज
त्रयविषयजौहूयेपिचतुर्गृहीतैकदेशस्यैवचतुर्गृहीतशब्देनलक्षणयोक्तस्तद्वदेव
ध्रौवषिसंभवात् एवमग्नौपभृतेचतुर्गृहीतस्यानेनविध्याभावान्नाष्टत्वस्यचतुष्टयल
क्षणार्थतासिध्येदितिदोषःपूर्वोक्तःस्यादेव किंचैवंध्रौवातूज्जुहामुपांशुयाजाद्यर्थंच
तुर्गृहीतंनसिध्येदित्यपिपूर्वोक्तोदोषः प्रसज्येतायदिचतत्रकृत्स्नचतुर्गृहीतसंस्कार

कहोमस्यांगत्वानुपपत्याचतुर्गृहीतंप्रतिहोममाक्षिप्येत ततःप्रयाजत्रयेपिप्रत्येकंता
दृशहोमस्यांगत्वानुपपत्यानुपपत्याप्रत्येकंचतुर्गृहीतमाक्षिप्येत अथचतुर्दशपौ
र्णमास्यामादुत्तयोर्हूयंतेत्रयोदशमावास्यायामिति सामान्यतोगिक्रामंजुहोतीत्या
दिविशेषतोलिंगदर्शनैरेवोपांशुयाजप्रयाजानूयाजाज्यभागेषुहोमप्राप्तिः चतुर्गृ
हीतंजुहोतीत्यनेननुप्राक्तनप्रायाजत्रयेचतुर्गृतसत्तद्व्यतिरिक्तेषुहोमवत्स्वचतुर्गृहीतंवि
धीयते प्राक्तनप्रयाजत्रयेतुचतुर्जुह्वांगृह्णातिप्रयाजेभ्यस्तदित्युद्देश्यभूतप्रयाज

साहित्यस्याविवक्षितत्वेन प्रतिप्रयाजं चतुर्गृहीतप्राप्त्याशंकायामपि जुहोतेकस्यैव च
तुर्गृहीतस्य तंत्रेण लिंगदर्शनप्राप्तहोमसाधनतासिद्धेः नतत्र चतुर्गृहीतं जुहोती
त्यस्य व्यापारइति तदप्ययुक्तं लिंगदर्शनमात्रस्य होमप्रापकत्वायोगात् अतएवत
त्र तत्र भाष्यकारेणोक्तं लिंगमसाधकं प्राप्तिरुच्यतामिति नच सप्तमेस्वरसामैक
कपालामिक्षं च लिंगदर्शनादित्यत्र लिंगमात्रस्य प्रापकत्वमिवात्रापि तथास्यादितिवा
च्यं तत्रापीतिकर्त्तव्यताकांक्षाभावनाविध्यन्यथानुपपत्त्यासामान्यतोनिदेशकल्पने

क्षः शर्कराइत्यर्थवादेनैव लिंगैर्विशेषमात्रावगमादिति अत्र ब्रूमायजतिचो
दनाचोदितेषु द्रव्यकेषु प्रतिपत्तिरूपे आचाराद्धोमे प्राप्तेनारभ्यवादेन चतुर्गृ
हीतं जुहोतीत्यनेन चतुर्गृहीतमात्रविधिः सोऽयुक्तरीत्याद्यप्रयाजत्रयव्यतिरि
क्तेष्विति यत्तु शास्त्रदीपिकायां सर्वप्रधानाधिकरणेन न्वाचारादेव होमः प्राप्तइ
त्याशंक्य दूषितं नाचारस्य स्वतः प्रामाण्याभावात् श्रुतिकल्पनस्य च प्रत्यक्षश्रु
तिसद्भावेनुपपत्तेः यदि चाचारप्रमाणको होमः स्यात्ततस्तस्य प्रकृतिविकृतिसा

धारणत्वाद्विकृतिष्वप्यौपदेशिकएवहोमइतिप्रत्यक्षद्वारत्वादाहवनीयादय
पवमानेष्ट्यादिषूपदेशादेवप्राप्तेरग्नयश्चस्वकालत्वादितिन्यायात् तत्रता
सामग्निःप्रकृतितःप्रयाजवदितिसूत्रकारव्यवहारोनोपपद्येतेति तदपिचतुर
होमविषयमेवतत्रैवप्रत्यक्षश्रुत्योपस्तरणादिवाक्यप्राप्तचतुरक्तानुवादेनहोम
विधिसंभवादाद्यदूषणापादनात् चतुर्गृहीतंजुहोतीत्यत्रतुनतदापत्तिःचतुर्गृही
तप्राप्त्यभावात्तदनुवादेनहोमविधेरसंभवस्योक्तत्वात् नापिद्वितीयदोषप्रसक्तिः

तासामग्निरितिसूत्रस्यचतुरक्तहोममात्रस्यविषयतयाप्युपपत्तेरिति॥ ॥
इतिश्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतस्यग्राज्य
धुरंधरश्रीभट्टनारायणागजभट्टशंकरकृतेमीमांसाचालप्रकाशेचतुर्था
ध्यायार्थसंग्रहः॥ ॥पंचमेअनियमोन्यत्रेत्यधिकरणेशाखाभेदेनाम्नातेनां
प्राजायाद्यनुमंत्रणानामेकोममैकाचतस्येत्यादीनांवसंतमृतूनांग्रीणामी
त्यादीनांचसमुच्चयंसिद्धंकृत्वाकिंकश्चिन्नियतःक्रमोस्त्वुतानियतइतिचिं

तितं तत्रशंक्यतेननुयद्यनुमंत्रणानामदृष्टार्थत्वंततोमंत्राधिकरणविरोधःत
थाक्रमश्चदेशसामान्यादित्यत्रचाविज्ञानलिंगानांप्रक्रियाविनियोजिका असी
त्यस्यचसामर्थ्यसंनिधावुपसंहृतमित्यनुमंत्रणदृष्टार्थत्वोक्त्यविरोधः तथामंत्रमु
च्चारयन्नेवमंत्रार्थत्वेनसंस्मरेत् शेषिणंतन्मनाभूत्वास्यादेतदनुमंत्रणमित्येवंलक्ष
णानुमंत्रणत्वव्याघातःअथदृष्टार्थत्वंततःसमुच्चयाभावेक्रमचिंतानयुक्तेति अत्रके
चित् मंत्राणांस्मृतिरूपंदृष्टमेवप्रयोजनं स्तोत्रशस्त्रमंत्रणामिव स्मृतिस्तुस्तोत्रश

स्त्रवदृष्टार्थप्रयाजानुमंत्रणेषुचयद्यपिश्रुतिवृत्याकर्मस्मृतिर्नभवतितथाप्यनु
मंत्रणाद्यमारभ्ययातात्पर्यग्रहात्सावश्याभ्युपेया॥यातुक्रमेश्रेत्यत्रस्मृतेरपिदृष्टा
र्थकोक्तिःकृतयागप्रत्यवेक्षणेनदृष्टार्थत्वादितिग्रंथेसाभ्युपेत्यवादमात्रमिति॥
तदयुक्तं॥तथासतिपूषादिस्मृतेरप्यदृष्टार्थायादर्शप्रकरणसंभवेननामंत्रणा
नामुत्कर्षायोगात्॥अतोयत्रमंत्राणांलिंगात्कर्मसमवेतार्थप्रकाशकत्वात
त्रस्मृतेरपिदृष्टार्थतैवतद्विषयत्वादेवचप्रायिकमनुमंत्रणलक्षणंलिंगमूलत्वा

त्॥ अतोनतद्दृशात्प्रयाजानुमंत्रणमंत्राणांलक्षणयास्मृत्यर्थत्वमे
व॥ कृतयागेत्यादिवार्त्तिकंचस्मृत्यर्थानुमंत्रणविषयमेवनाभ्यपेत्यवादः त
स्मिन्मेवतुसत्यपिचादृष्टार्थत्वइतिवार्त्तिकंनित्यानुवादइति॥ यद्वामंत्रार्थत्वे
नेतिनमंत्रप्रतिपाद्यतयेत्यर्थः करणमंत्रेष्वतिप्रसंगात्॥ किंतुप्रयोजनवच
नोयमर्थशब्दः ततश्चक्वचिद्प्रतिपाद्यक्वचित्प्रतिपाद्यः शेषीमंत्रप्रयोजनत्वे
नयत्रस्मर्यतेतदनुमंत्रणमित्यर्थः॥ एवंचमंत्रमुच्चारयन्निति शतृप्रत्ययोवर्त

मानार्थः समर्थितोभवति॥ मंत्रजन्यानुस्मृतिर्मंत्रपाठोत्तरकालेतितत्रमंत्रमुच्चा
रयन्स्मरेदित्यनुपपन्नंतेनदृष्टार्थस्याप्याग्नेयाद्यनुमंत्रणस्यादृष्टार्थस्यापिचप्रा
याजाद्यनुमंत्रणस्यपाठकालेशेष्यनुसंधानादुभयत्रानुमंत्रणतापियुक्ताऽदृ
ष्टार्थत्वाच्चसमुच्चयोपीति॥ ऋजवस्तुकरणत्वाभावेसतीतिविवक्षितत्वान्नकर
णेष्वतिप्रसंगः उच्चारयन्निति चवर्तमानसामीप्येवर्त्तमानवद्वेतिशाना॥ मंत्रा
र्थत्वेनेतिमंत्रप्रतिपाद्यत्वेनेत्येवार्थः ततश्चप्रयाजानुमंत्रणेष्वप्यनुमंत्रणस

माख्येयेवलक्षणयायत्सदृश्यप्रतिपादितंदृष्टार्थत्वकल्पनेपिआप्यादानमेव
वदूचनं।समुच्चयार्थंभविष्यतिकल्पचिंतायेत्याहुः॥ ॥इतिप्रयाजानुमंत्रणाधि
धिकरणसमर्थनं॥ ॥षष्ठाध्यायेयस्यहविर्निरुप्तंपुरस्ताच्चंद्रमाअभ्युदे
तिसत्रेधातंदुलाविभजेद्येमध्यमाःस्युस्तानग्नयेदात्रेपुरोडाशमष्टाकपाल
निर्वपयेरुविष्ठास्तानिंद्रायप्रदात्रेदधंश्चरुंयेणिष्ठास्तान्विष्णवेशिपिविष्टा
यश्रुतेचरुमित्यत्रप्रक्रांतेदर्शकर्मणिदेवतातद्गुणचरुत्वविधौवाक्यभेदात्कर्म

डा॰ राजेन्द्रप्रसाद जी स्मारक संग्रहालय
MEMORIAL

तरमितिपूर्वपक्षयित्वासिद्धांतितं॥ मंत्रार्थवादादौशिपिविष्टोविष्णुरित्यादिसा
मानाधिकरण्येनश्रुत्यैवाग्न्यादिपदसामानाधिकरण्यादिशिष्टावगतादेवता
स्तिदातृप्रदातृशिपिविष्टशब्दानांचयौगिकत्वेनश्रुत्यैवाग्न्यादिपदसामानाधिकर
ण्यासदृश्यप्रतिपादितंविशिष्टदेवताकारकमेकमेवविधेयं॥आभ्युदयेष्टिप्रक
रणेचसहस्रपयौतीतिवचनमस्तितद्देवतैक्याद्दधिरुविष्ठयोश्चताणिष्ठयोश्च
सहपानकंविधत्तेततश्चार्थप्राप्तंचरुत्वंदधिश्चतयोश्चाधिकरणत्वमनूद्यते

केवलंतुदेवताकारकंविशिष्टंविधीयतेप्रकृतेदर्शेनिवाक्यभेदाभावान्नकर्मांतर
विधिरिति॥ नदेतदाक्षिपंतिदीक्षिताःदधिवाक्येशृतवाक्येचप्रतिद्रव्यंदेवतासं
बंधबोधनाद्वाक्यभेदोदुःपरिहरइतिकर्मांतरत्वपूर्वपक्षोदुःपरिहरःअंगीकृ
तंचषष्ठएववाक्यभेदप्रसंगपरिहारायप्रकृतयागहानेनकर्मांतरविधिपरत्वंय
थायस्योभयंहविरार्तिमार्छेदैंद्रंपंचशरावमोदनंनिर्वपेदित्यत्रौदनद्रव्यवि
धानात्पंचशरावपरिमाणविधानान्माहेंद्रेणास्यदेहार्त्तिनिमित्तकस्यसहविकल्प

नःप्राप्तस्येंद्रस्यनित्यवद्विधानाद्वाक्यभेदभियेवप्रकृतकर्महानेनकर्मांतरस्यदेह
र्त्तिनिमित्तकस्यविधिःसिद्धांतितः॥अन्यथाभ्युदयेवाक्यभेदेसोद्यदेवतांतरमात्र
विधिवद्यस्योभयमित्यत्राप्यार्त्तदोहप्रतिनिधिविधिरितिपूर्वपक्षएवपरावर्त्तेतेनि
नदेतदनतिक्षुण्णमीमांसाध्यायानांविभीषिकामात्रमेव॥तथाहि॥वाक्यभेदाद
पिबलवदानर्थक्यमप्रामाण्यापत्तेः॥अतएवश्रुत्यादीनामप्यानर्थक्यप्रतिहतानां
विपरीतंबलाबलमित्यलं॥तदिहविध्यंतरैकवाक्यत्वाभावात्सहश्रपयतीतिसह

पाकविधिराज्यदयवाक्यस्यकर्मांतरविधित्वेदधंश्चरुंश्रृतेचरुमित्यतएवसहपा
कप्राप्तेरनर्थकःस्यात्नचप्राजापत्यंघृतेचरुंनिर्वपेच्छृतेकृष्णलमायुःकामइति
प्रधानविधौघृतेश्रपयतीतिगुणविधिप्राप्तघृतानुवादवत्कर्मांतरस्वेप्यभ्युद
यवाक्येसहश्रपणविधिसिद्धत्वरूपानुवादःस्यादितिवाच्यं॥उभयप्राप्तावनुभय
प्राप्तोवासंबंधविधिरितिहिजाघन्यधिकरणेउक्तंचर्वनुवादेचनहेवतासंबंधा
नाद्यागविध्यसिद्धिः॥अतःसहपाकविध्यानर्थक्यपरिहारायतद्धेतैवतात्पर्यग्र

हान्निर्वपेदित्यस्यानुषंगेणरूविष्टक्षोदिष्टदधिश्रतरूपद्रव्यचतुष्टयेपिदेवता
न्वयविधानार्थत्वात्प्रतिद्रव्यंवाक्यभेदमेवाभ्युपेत्यनप्रकृतकर्महानमप्रकृतक
र्मांतरविधानंचयुक्तं॥तदुक्तं॥गौणंलाक्षणिकंवापिवाक्यभेदेनवास्वयं॥वेदो
यमाश्रयत्यर्थकोनुतंप्रतिकूलयेदिति॥वाक्यभेदाभ्युपगमस्यह्येतद्वार्तिकोक्तस्ये
दृग्विधमेवोदाहरणंनान्यत्॥गौणस्योदाहरणंतुयथावैश्येनोविपत्यादत्तइति
लक्षणोदाहरणंतुमत्वर्थलक्षणेव॥अर्तिवाक्येतुसहपाकविधिवदानर्थक्येनता

त्पर्यग्राहकस्याभावाद्वाक्यभेदपरिजिहीर्षयाकर्मांतरविधिरेवन्याय्यइतिवैष
म्यं ॥ इत्यभ्युदयेष्ट्यधिकरणसमर्थनं ॥ ॥ षष्ठएवयद्यद्वाताजघन्यःस्यात्पुन
यज्ञेसर्ववेदजघन्यस्यसंदद्याद्यथेतरस्मिन्नित्यधिकरणेऽक्तंपौर्वापर्येपूर्वदो
र्बल्येस्थितेचिंत्यतेयदिप्रतिहर्त्रपछेदेजाते पश्चादुद्गाता पछिद्यतेतदापुनर्य
ज्ञेसर्ववेदसंदेयमुतद्वादशशतमिति॥ तदर्थंयद्यद्गाता पछिद्येतादक्षिणोयज्ञःप
रिसमाप्यतेइत्यदक्षिणताविधीयतेनूद्यतेवेति॥ तत्रयत्पूर्वस्मिन्दास्यन्निति क्रतु

स्वाभाव्याद्वादशशतंदेयंप्रतीयतेनचतस्यप्रतिहर्त्रपछेदनिमित्तकसर्ववेदसेनबा
धात्सर्ववेदसमेवदास्यन्नासीदित्यद्गात्रपछेदेतदेवपुनःप्रयोगेदेयमितिवाच्यं ॥
तस्याप्युद्गात्रपछेदेविहितेनादक्षिण्येनबाधादिप्राप्तं॥ सिद्धांतस्तुनात्रदाक्षिण्यं
विधीयतेवाक्यभेदात्॥ किंतुपूर्वस्मिन्प्रयोगेदत्तव्यासतीदक्षिणातत्तउत्कृष्योत्त
रप्रयोगेनिक्षिप्यतेतेनदक्षिणोयज्ञइत्यनुवादः पूर्वप्रयोगेचोद्गात्रपछेदसतिद्वा
दशशतंबाधित्वासर्ववेदसमेवदातव्यमासीत्अतस्तदेवपुनःप्रयोगेदेयमिति॥

तत्रेदं नाचिंतितं यदि प्रतिहर्त्ता जघन्यः स्यात्किं भवतीति॥ तेनेदमवश्यं विचार्यं
प्रतिहर्त्रपच्छेदवत्प्रयोगो विहितेन सर्ववेदसेन पूर्वजातो द्वात्रपच्छेदे निमित्तेप्रा
प्तेनैमित्तिकं बाध्यमिति पौर्वापर्यन्यायेन स्थिते किं पुनः प्रयोगोपि बाध्यते उतो
त्कर्षविध्यर्थसिद्धमदाक्षिण्यमात्रमिति॥ तत्र विरोधनिमित्तको बाधः न च पु
नः प्रयोगांशेन सह विरोधोस्ति सर्वस्वदानस्य किंतु दक्षिणोत्कर्षेणैव पूर्वप्रयो
गादाक्षिण्यद्वारेनितावदेव बाध्यते॥ उच्यते॥ यथा षष्ठ एव साम्युत्थाने विश्वजि

त्क्रीते विभागसंयोगादित्यधिकरणे यदि सत्रायदीक्षितानां साम्युत्तिष्ठासे सोमम
पभज्य विश्वजिता यजेतोत्क्रदाहृत्य किमयं विश्वजित्क्रीतराजकस्यैवोत्थाने उताक्रीत
राजकस्यापीति संशय्य तदर्थं सोममपभज्येति विधिरनुवादो वेति संशय्य विधिस्त
त्रश्चतद्विशिष्टनैमित्तिकं क्रीतराजक एव शक्नोति कर्तुं नाक्रीतराजक इति तस्य नवि
श्वजिदिति प्राप्ते सोममपभज्येत्यनुवादो र्थसिद्धत्वात् सत्रार्थत्वे कीकृतधनानां सत्र
त्यागे दक्षिणाद्रव्यस्यैव सोमस्यापि विभज्यग्रहणं प्राप्तमेव॥ न विधिस्तत्र श्चवि

श्वजिन्मात्रंनैमित्तिकं॥तच्चशक्यमेवार्क्षीनराजकेनकर्तुमितितस्याप्यधिकार
इतिसिद्धांतितं॥तत्रानुवादेनसिद्धांतकरणंव्यर्थमेवस्यादित्येवंज्ञायतेतत्रवि
शिष्टोनैमित्तिकंतत्रविशेषणबाधेविशिष्टमेवबाध्यमिति॥अतःप्रकृतेपिसर्वस्व
दानेनपुनःप्रयोगविशेषणेपुर्वप्रयोगदेयदक्षिणादानेबाधितेपूर्वमुत्पन्नंनैमि
त्तिकज्ञानंविशिष्टपुनःप्रयोगविषयंकृत्स्नमेवबाध्यतेइत्येवंन्याय्यं॥तेनायम
त्रवाक्यार्थःप्रस्तोहप्रतिहर्त्रपछेदेदानविकारमात्रंउद्गात्रपछेदेतुनपरंसएव

किंतुपुनःप्रयोगोपीति॥ततश्चनेतरयोःपुनःप्रयोगइतिगम्यते॥अन्यथायोग
पद्येपितत्रविप्रतिषेधाद्विकल्पइत्यधिकरणोक्तोविकल्पोप्युच्छिद्येतपूर्वपक्ष
एवतुसमुच्चयःस्थिरःस्यात्॥तत्रापिहिविशेषणेनैवसहसर्ववेदस्यविरोधा
द्विकल्पःस्यात्पुनःप्रयोगश्चस्यादेव॥अथतत्रकादक्षिणेतिचेत्॥तत्रपौर्वाप
र्येपुनःप्रयोगेकादक्षिणेतिप्रतिबंदीमुद्धर॥अथसद्वृत्तापृछसितःशृणु॥द्वाद
शशतमुभयत्रेति॥पौर्वापर्येणयुगपद्वापछेदेहिपूर्वप्रयोगेद्वादशशतंदास्यंत्रासी

दितितदुत्कर्षविशिष्टःपुनःप्रयोगःस्यादेवंपूर्वप्रयोगेचोभयत्रसर्ववेदसंदीयेतेति
योगपद्येपिसमुच्चयएवस्यान्नविकल्पइतितदधिकरणोच्छेदापत्तिः तस्माद्विशेष
णमात्रबाधंसर्ववेदसेनवदनुपेक्षणीयएवेत्यपरम्यते॥ ॥इतिप्रतिहर्त्रु
जघन्यत्वेपुनःप्रयोगबाधनिरूपणं॥ ॥अथेहकथंयत्राद्यप्रयोगेकेवल
मुद्गातापच्छिन्नस्यनिमित्तेतुद्वितीयप्रयोगेकेवलंप्रतिहर्तापच्छिन्नःअत्राद्यप्रयोग
गतोद्वादशशतदक्षिणोद्वात्रपच्छेदाद्द्वितीयप्रयोगेप्राप्तायपूर्वस्मिन्दास्यन्त्यादि

DR. BHAU DAJI
डाक्टर भाऊदाजीइत्याख्यसंस्कृत
MEMORIAL

तिसाद्वितीयप्रयोगमनप्रतिहर्त्रपच्छेदनिमित्तेनसर्ववेदसेनबाध्यते॥ननुद्वितीय
प्रायश्चित्तरूपत्वेनाद्यप्रयोगांगं॥यद्यद्गातानजघन्यःस्यादित्यत्रचेदमुक्तंपूर्वप्रयोगे
गांभूतेवदक्षिणोत्तरप्रयोगेउत्कृष्यतेनत्वाद्यप्रयोगेअदाक्षिण्यंविधीयतइति। तत
श्चद्वादशशतदक्षिणाद्यप्रयोगांगत्वेनैकतदीयांगद्वितीयप्रयोगांगभूतंप्रतिह
त्रपच्छेदनिमित्तंसर्ववेदसमेवबाधेतअंगगुणविरोधान्यायादितिचेत्॥न। एवम
त्कर्षविधेरदृष्टार्थत्वंप्रसज्येत॥नत्वुत्तरप्रयोगगतयादक्षिणायापूर्वप्रयोगोपयि

कीआवृत्तिः क्रियते किंचपूर्वप्रयोगांगत्वेनैवावगतादक्षिणातत्रआच्छिद्रोत्तरप्र
योगांगत्वेनेहविधीयतेअदक्षिण्यानुवादवाक्यशेषान्नगिरागिरेतिवाक्यशेषे
णैवगिरापदस्यानापत्तिरिवापदस्य नन्वाच्छिद्रविधानंचतुर्थेनिरस्तंयदानि
थ्यायांबर्हिरित्यादौन तत्रह्यातिथ्यप्रकरणेप्रसूतंबर्हिर्विहितंतत्प्रकरणपाठवै
यर्थ्यापत्तेरातिथ्यांगमेवावश्यं ततश्चतस्यानिर्विषयतापत्तेःसार्वदिकमाच्छिद्रवि
धानंनयुक्तमित्यक्तं इहत्वाच्छिद्रविधानंघटतएवनैमित्तिकत्वात् निमित्ता

भावेचतस्यादक्षिणायाःपूर्वप्रयोगांगत्वोपपत्तेरिति किंचद्वितीयप्रयोगांगक
र्त्रानतिसिध्यर्थेयंदक्षिणातत्प्रयोगांगभूतैवेत्यचिनंनाद्यप्रयोगांगभूतेतिआद्यप्र
योगांगकर्त्रानतिसिध्यर्थत्वाभावात् अन्यप्रयोगस्यहिऋत्विजःसंस्करोतिअन्यप्र
योगस्यचांगमित्यपूर्वायुक्तिःततश्चतद्दक्षिणालोपेप्रायश्चित्तमपिद्वितीयप्रयोगां
गमेवनाद्यप्रयोगांगमिति तस्मादाद्यप्रयोगगतोद्गात्रपछेदनिमित्तकेद्वितीयप्रयो
गेउत्कृष्टाद्वादशशतदक्षिणाद्वितीयप्रयोगगतप्रतिहर्त्रपछेदनिमित्तकसर्ववेदस

दक्षिणावद्द्वितीयप्रयोगांगमेवनाद्यप्रयोगांगमित्यंगगुणविरोधन्यायाविषय
त्वान्नपूर्वयोत्तराबाध्यतेकिंत्वनयोर्द्वितेनपौर्वापर्यन्यायेनपूर्वैर्बोत्तरयाबाध्ये
तइतिसूक्तं॥ ॥इत्याद्यप्रयोगेकेवलोद्वापच्छेदेद्वितीयप्रयोगेचकेवलप्रतिहृ
त्रपच्छेदेपौर्वापर्यन्यायप्रवृत्तिनिरूपणं॥ ॥इतिश्रीमत्पदवाक्यप्रमाणपा
रावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मज
शंकरकृतेमीमांसाबालप्रकाशेषष्ठाध्यायसंग्रहः॥ ॥सप्तमाद्येतिदेश

लक्षणंभाष्ये श्लोकमप्युदाहरंतिप्राकृतात्कर्मणोयस्मात्तत्समानेषुक
र्मसुधर्मप्रदेशोयेनस्यात्सोतिदेशइतिस्थितिरिति सपुनर्विभक्तविभ
गेनसप्तविधःप्रथमंतावन्नामातिदेशोवचनातिदेशश्चेतिद्वेधा तदुक्तं
ये सचनाम्नावचनेनचतत्रनामत्रिविधंधर्मातिदेशकंकर्मनामसंस्क
रनामयौगिकंचेति वचनंपुनर्द्विविधंप्रत्यक्षश्रुतमानुमानिकंचेति
आनुमानिकमपित्रिविधंचोदनासामान्यादिदेशःआश्रयातिदेशःस्थान

पत्यतिदेशइति॥तत्रयद्यप्यंत्योद्वौभेदौसप्तमेध्यायेनोक्तौतथापितयोरा
द्यइंद्रियकामाधिकरणेनिरूपितेःबुद्धौविपरिवर्त्तमानआश्रयएवहित
त्वेतिकर्तव्यतायाआश्रयवदितिकल्पनयाप्रापकीभवतिनचोदनासामा
न्यं॥स्थानापत्यतिदेशोपिफलचमसाधिकरणेनिरूपितःनचसोमंभक्षयती
तिचोदनासामान्यमिहभक्षश्रुतेरितिवाच्यंइंद्रियकामवाक्येजुहोतेरिवभक्षयो
गात्सोमकार्यापत्तिःसोमकार्यस्यचस्वेःक्रयाभिषवादिधर्मैर्विनानुपपत्तेरकं

क्षयासोमवदितिकल्पनाभावंचोदनासामान्येंतर्गतइतिसप्तविधत्वं-
सिद्धं॥अतश्चश्लोकेतत्समानेत्यविवक्षितंचोदनासामान्यनिमित्ता
तिदेशव्यतिरिक्तेभेदसप्तकेअव्याप्तेः॥तथाकर्मस्वित्यप्यविवक्षितं॥फल
चमसविषयेस्थानापत्यतिदेशभेदेअव्याप्तेःयद्वाफलचमसवदध्युन्मार्जन
स्यापिविधेयत्वेनवाक्यभेदप्रसंगात्तदुभयविशिष्टमवेक्षिनयजमानच
मसाभ्यासप्रयोगांतरमेवविधीयतइतिकर्मग्रहणेविवक्षितेपिनाव्याप्तिः॥

तथापिस्वलेवाल्लीयूपोभवतीतिखलेवाल्लीद्रव्यविषययूपशब्दस्यसंस्कारना
मातिदेशकर्मग्रहणविवक्षायामव्याप्तिःस्यादेवेतितदविवक्षितमेवे॥अत्रमि
श्राःषड्विधएवातिदेशःयौगिकशब्देनहिकेवलयौगिकंबोक्तंयोगरूढवा॥तत्रा-
द्यंविश्वजितिसर्वपृष्ठादिवन्नैवनामगुणविधित्वात्तुत्तरंत्वग्निहोत्रोद्विदा-
दिकर्मनामशब्देनैवोक्तं॥प्रायणीयेतुप्रथममयंत्वनेनेतियेनैवयोगेनद्वादशा-
हेप्रवृत्तिस्तेनैवगवामयनेपीतिश्रुतिवृत्तेर्नधर्मलक्षकमित्यनतिदेशकमेव॥

थेलतिदेशकानतिदेशकनामसंभूम्नातिदेशकशब्दइति॥वयंतुकर्मनामेति
प्रागुक्तयोगरूढभिन्नंश्येनादिनहितत्रापिरूढिरस्तिगुणविशेषस्यैवनिमित्त
त्वात्सिंहोमाणवकइतिवत्॥नचयोगःयौगिकमितिचयोगरूढमितिभाष्या
र्थेनकोपिदोषःदुष्टीकातुयौगिकंनाद्रिंतिदेशकमितिप्रायणीयादिकेवलयौ
गिकपरंभाष्यस्थंयौगिकपदंनभवतिकिंतुयोगरूढपरमित्येवमाशयः॥इ
त्यतिदेशलक्षणतद्भेदनिरूपणं॥ ॥इतिश्रीमत्सदयाक्यप्रमाणपाण

धारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभ
ट्टशंकरकृतेमीमांसाबालप्रकाशेसप्तमाध्यायार्थसंग्रहः॥ ॥अष्टमेध्या
येयस्यलिंगसमर्थसंयोगादित्येतत्सूत्रार्थप्रपंचार्थेष्वधिकरणेषुनाना
विधानिप्रकृतिलिंगान्युक्तानिदृष्टिषुतद्धितेनदेवतानिर्देशएकद्विदेवतत्व
मोषधद्रव्यकत्वंआज्यद्रव्यकत्वंपयोद्रव्यकत्वंदधिद्रव्यकत्वंउज्वलविशदद्र
व्यकत्वंद्रवसमानवर्णद्रव्यकत्वंपशुप्रभवगतिमद्द्रव्यकत्वंनिर्वपतिवत्वमित्य

दीनिपशुषुआलभतिवत्वंप्राणिद्रव्यकत्वंसत्याकालत्वंपशुगणत्वंइत्यादी
निसोमेषव्यक्तचोदितत्वंअहर्गणत्वमहीनत्वंसत्रत्वंसंवत्सरसत्रत्वंनिकायि
त्वमित्यादीनि तत्रयस्यलिंगमर्थसंयोगादितिसामान्यसूत्रेणैवविशेषवि
चरणार्थैःसूत्रांतरैरनिबद्धान्यविकृतिविद्यान्यपिचोदनालिंगानिसा
मान्यतःसंगृहीतानीत्यन्यथानुपपत्त्यावश्यंकल्पनीयंयथातेषामङ्गत्वार्थ
वशेनेतिपादव्यवस्थितःसंगृहीतानीत्यन्यथानुपपत्त्यावश्यंकल्पनीयंहेत्वंत

रस्यापिवृत्तादिवशस्योपलक्षणार्थमित्युक्तं॥ कानितान्यन्यानिचोदनालिं
गानीतिचेत्॥ उच्यते॥ एकंताक्योदनालिंगंद्रव्यदेवतासंबंधप्रतिपादक
तद्धितांतपदाक्षरसाम्यं॥ यथाग्नावैष्णवमेकादशकपालंनिर्वपेत्सरस्व
तीमाज्यस्ययजेतबार्हस्पत्यश्वरुरिति॥ अत्रैकादशकपालत्वमैंद्राग्नमे
कादशकपालंनिर्वपेदितिप्राकृतऐंद्राग्नेतायामेतदग्नीषोमीयमेकाद
शकपालंपूर्णमासेप्रायश्चित्तिविहितेप्राकृतेग्नीषोमीयेवाविशिष्टमेवंहि

DR. BHAU DAJI
डाक्टर भाऊदाजी इत्याख्यस्मारकम्
MEMORIAL

देवतत्वंनिर्वपतिवत्वंच॥ यद्यपिद्वितीयंप्राकृताग्नीषोमीयप्रधानचोदनाय
नास्तितथाप्यंगविधिनानिर्वापवत्वमस्त्येव॥ अतस्तत्रद्रव्यदेवतासंबंधप्रति
पादकतद्धितांतपदेग्निमुखत्वसाम्यमेवचोदनालिंगंप्राकृताग्नीषोमीयविधे
तातिदेशनियामकं॥ तदेतच्चोदनालिंगंमीमांसकानामप्यभिप्रेतंलक्ष्यते॥ अन्य
थाष्टमएवतृतीयपादाद्येहविर्गणेपरमुतरस्येत्यधिकरणेआग्नावैष्णवाद्येग्नी
षोमीयस्यविध्यंतइतिसाध्येदेवतासामान्यादितिहेतुरसंगतःस्यात्॥ द्विदेवत्य

त्वस्यैंद्राग्नेपितुल्यत्वात्एवमग्निसमवायमात्रस्यापि तच्छितमात्रंत्वाग्नेयेपितु
ल्यंतदवश्यंपंचाक्षरतच्छितांतएवत्वमग्निमुखतच्छितांतपदवत्वंवावश्यंकिंचि
च्चोदनालिंगांतरमिद्धसिद्धांतहेतुनयाविवक्षितंगम्यते एवमन्वारंभणीयाया
माग्नावैष्णवमेकादशकपालंनिर्वपेद्दर्शपूर्णमासावारप्यमानइति आग्नावै
ष्णवमेकादशकपालंनिर्वपेदीक्षिष्यमाणइतिचद्यावापृथिव्यमेककपालमि
त्यत्रतुपंचाक्षरतच्छितादेवचोदनालिंगादग्नीषोमीयविकृतित्वं आश्विनद्वि

कपालेतुद्विरेवतात्वेसतिन्यक्षरतच्छितवत्वादैंद्राग्नविकृतित्वं॥एवंमारुतंसप्त
कपालंमरुद्भ्यःसांतपनेभ्योमध्यंदिनेचरुमित्यत्रापिसांतपनरूपविशेषणाधिक्ये
पिप्राधानभूतदेवताविधिरक्षरएवेतिन्यक्षरदेवताविधिसादृश्यादनेकदेवता
त्वाच्चैंद्राग्नविकृतित्वमेवसौमेंद्रंचरुंनिर्वपेच्छ्यामाकंसोमवामिनइत्यत्रतुन्यक्ष
रत्वेसत्यपिअर्थवाचिशब्दगतसंख्यायाःप्रथमोपस्थितायाअपिबहिरंगत्वादंत
रंगसोमरूपार्थसमवायेनेंद्रसमवायसोम्येपिचसोमप्राधान्यात्तदुपस्थितोग्नी

षोमीयविध्यंतएव एवमिंद्रासोमीयेइंद्रमुख्यत्वादैंद्राग्नविकृतित्वं सोमापौष्ण
सोमारौद्रदौतुसोमसमवायमात्रेणाग्नीषोमीयविकृतित्वं शुनासीरियेऐंद्रा
वैष्णवमित्यत्रसत्यप्यग्नीषोमीयचोदनालिंगेपंचाक्षरत्वेक्षरसंख्यायाबहि
रंगत्वादंतरंगेंद्रसमवायेनैंद्राग्नविकृतित्वं एवमैंद्रापौष्णेंद्राबार्हस्पत्या
दौ एवमैंद्रःपुरुरोडाशःसौम्यश्चरुरित्यत्रेंद्रसमवायेनैंद्राग्नविकृतिःपूर्वमु
त्तरस्तुसोमसमवायेनाग्नीषोमीयविकृतिः वैश्वदेवंचरुंनिर्वपेद्धातव्य

वानित्यादौतुचतुरक्षरेनकिंचित्र्यक्षरपंचाक्षरत्वादिनियामकमस्तीत्यनियम
एवैंद्राग्नाग्नीषोमीयविकृतित्वं तदिदमुक्तमापस्तंबसूत्रेएकदेवताआग्नेयवि
कारादिदेवताआग्नीषोमीयविकारबहुदेवताश्चैंद्राग्नविकारावेति अथैंद्राप
विकारावेति द्विदैवत्येष्वपिसंबंधनीयं तेनोभयत्रैवविकल्पःसचव्यवस्थितो
मदुक्तोदाहरणेषुपूर्वोक्तरीत्याक्वचिच्चाव्यवस्थितविकल्पोपीति कपर्दितुयाग
विकृतीनांद्विबहुदेवतापदेषुचत्वार्यक्षराण्यधिकानिवाताअग्नीषोमीयविकारा

सांतुत्रीण्युनानियातोऐंद्राग्नविकाराअन्यत्रप्रकृतिदेवताभ्यइत्याहतत्रह्यक्षरेण
सामीप्याभ्यक्षरोपस्थितावपिषडक्षरादिभिश्चसामीप्यात्पंचाक्षरोपस्थितावपि
चतुरक्षरेउभयसाम्योत्कथं पंचाक्षरस्यैवोपस्थितिरितिचिंत्यं। यस्यतुकर्मणः
क्वचिदुत्पत्तिचोदनायांकेनचित्प्रकृतिलिंगेनकिंचिद्विकृतत्वमवधारितंतस्य
कर्मणोन्यत्रातिदिष्टस्योहेनान्यदेवतात्वेपिनतद्धेतुकंकर्मांतरविकृतित्वंभवति
पूर्वावधारितकर्मविकृतित्वंवाअपैति। अवधारितांगविशिष्टस्यैवातिदेशात्॥

यथाग्नीषोमीयपशुपुरोडाशस्याग्नीषोमीयस्यवपयाप्रचर्याग्नीषोमीयंपशुपु
रोडाशमनुनिर्वपतीत्यग्नीषोमीयपशुप्रकरणोत्पन्नस्याग्नीषोमीयमितिप्रकृति
लिंगसंयोगेनदर्शपौर्णमासिकाग्नीषोमीयपुरोडाशविकृतित्वेनावधारित
स्याग्नेयेसवनीयेऐंद्राग्नेचनिरूढपशावनिष्ठस्योहेनाग्नेयत्वेऐंद्राग्नत्वेचसत्यपि
तत्रप्रत्यक्षचोदनाभावेनचोदनालिंगासंभवात्साकल्येनैवपशुपुरोडाशयागस्य
प्रकृतावग्नीषोमीयमितिचोदनालिंगेनावधारितंतद्दर्शपौर्णमासिकाग्नीषोमी

बा॰
२३५

यपुरोडाशविकृतित्वेन बाध्यतइतितदीयमेवानुमंत्रणादि संभवतीतिधूर्तस्वा
म्यादेःसवनीयेआग्नेयस्यपशुपुरोडाशस्याग्नेयविकृतित्वंनिरूढेचैंद्राग्नस्यपशु
पुरोडाशस्यैंद्राग्नविकृतित्वमित्यभिधानमुपेक्ष्यमेव यत्तुतद्रूमकमापस्तंबसूत्रं
तदप्यंगंबासमभिव्याहारादितिवद्धुतितदनुसारिन्यायविरोधाद्बाध्याअतएवका
तीयानेतदनुमन्यंतइति॥ ॥इत्याष्टमिकप्रकृतिलिंगभेदप्रपंचनिरूपणं॥ ॥
पार्वणहोमयोस्त्वप्रकृतिरितिविशेषनिर्देशापवादःफलनियमकर्तृसमुदायव

दृष्टमएववक्तव्योपिकथंचित्प्रसंगान्नवमउक्तःप्रमेयंचाष्टमिकमितीहैवतत्रकि
ञ्चित्यते स्रुवेणपार्वणोजुहोतीतिसंख्ययाकर्मणोदर्शपूर्णमासदेवत्योर्होमौविधीयेते
तत्रपर्वशब्दःपृणातेर्दानकर्मणोनिष्पन्नःकर्मवचनस्तेनकर्मैवदेवतासाचस्मरणी
यत्वेनसंस्कार्यातत्रयद्येकैकोहोमःषड्धर्मवत्पठस्यात्ततोऽविद्यमानकर्मांशेअद
ष्टार्थतापद्येततत्परिहारायएकःपौर्णमासीदेवत्योपरोमौवास्यादेवत्यइतिकल्प्य
तेतेनप्रकरणाविशेषिसूक्तवाक्न्यायेनसंस्कार्यवशाद्यावच्छासौर्यादौचसंस्का

र्यस्य समुदायस्याभावादनतिदेशइत्यधिकरणार्थः॥ तत्र कालभाज्येतिपूर्वप
क्षेनिरस्तेपिपूर्वपक्षांतरं प्रतिभाति। पौर्णमास्यमावास्याशब्दयोः पौर्णमास्यधि
करणे समुदायनामत्वनिरासेन यागनामत्वमुक्तं॥ तद्वत्पर्वशब्दोपिन समुदाय
वाची किंतु यागवाची पृणातेर्दानाभीन्निष्पन्नत्वात्। पर्वत्येकशब्दोपादानात्तत्रा
याद्दियागानां साहित्यं प्रतीयतेवत्तु तेषां संस्कार्यत्वेनोद्देश्यविशेषणत्वादवि
वक्षितां। अतः प्रकृतौ तंत्रानुष्ठाने नाग्नेयादियागत्रयसंस्कारेपि प्रत्येकधर्म

त्वात्प्रत्येकं विकृतौ सौर्यादावतिदेशः स्यादेवेति अत्रोच्यते विधिमात्रप्रामाण्यिका
देवतेत्युक्तमिंद्रमहेंद्राधिकरणे विधिशब्दस्य मंत्रत्वेभावः स्यादितिदृशमेव
अतः पार्वणादितिहितोदेवताविधिस्तावदवश्यं वाच्यः। तस्यैवानुसंस्कार्यस
मर्पकत्वेवैरूप्यलक्षणवाक्यभेदापत्तेः सदेवताविधिरेव। पर्वदेवत्यस्यचहो
मस्य पर्वस्मारणसामर्थ्याद्विंगादाकाश्च पर्वप्रतितादर्थ्यं भवतिरव्यत्ययो
भवतिसामर्थ्यवाक्ययोः श्रुतिकल्पकत्वात्। पादशानांचकर्मणांविधेयविशे

षणविवक्षयापरस्परसहितानांदेवतात्वमवगतंतादृशानामेवभाव्यत्वंभ
वतिनप्रत्येकमितिप्रत्येकंविकृतावनतिदेशः नन्वेकस्यैवपुंसरूपपादे
यतादृशायांविवक्षितमेकत्वंस्वर्गकामइतिपदांतरेणोद्देशदशायांत्वविव
क्षितंतद्वत्सर्वेषामप्युपादेयतादृशायांविवक्षितंसाहित्यंपदांतरेणोद्देश
दशायांत्वविवक्षितंस्यादितिचेत्॥ न॥ कस्मित्तथावाक्येऽद्देश्यसाहित्यविवक्षा
यामपिवाक्यभेदाभावाच्चैतदुक्तंचित्राधिकरणे॥ श्रूयमाणस्यवाक्यस्य

DR. BHAU DAJI
डाक्टर भाऊदाजी इस्टारक्यस्मारक
MEMORIAL

न्यूनाधिकविकल्पने॥ लक्षणावाक्यभेदादिदोषोनानुमितेत्वसाविति॥ नविव
क्षितसाहित्यदेवताकोहोमोदृष्टार्थतयाशक्यएकैकेनपर्वणास्वार्थत्वेनगृहीतु
मितिविधेयसामर्थ्यादुद्देश्यसाहित्यविवक्षालभ्यते॥ यस्योभावभोऽनुगतावपि
निमित्तोचेदभ्युदियाद्वापुनराधेयंतस्यप्रायश्चित्तिरित्यत्रषष्ठेविधेयसामर्थ्यान्निमित्त
विशेषणाग्निसाहित्यविवक्षालभ्यतेइति॥ नचेमौपार्वणहोमौविकृतौनातिदिश्ये
तेइतिसामान्यतोयद्यप्युक्तंतथाप्येकस्मिन्द्वयोर्वानातिदिश्येतेबहुषुत्वदिनिश्येतेण

वायथावैश्वदेवादिपर्वणितोहिप्राकृताग्नेयास्तत्समप्रधानयागांतरसहितस्यसं
स्कारकाविनिवैश्वदेवाद्यंतर्गतैकैकयागस्यतत्समप्रधानेनतदेकप्रकृतिकेनतद
न्यप्रकृतिकेनवायागांतरेणसहितस्यसंस्कारार्थमतिदेशस्याभावेव।वैकृतप्रधानप्र
यागानांप्राकृतप्रधानयागरूपानापन्नत्वात्। यथाग्नीषोमीयस्यवपयाप्रचर्याग्नीषो
मीयंपशुपुरोडाशमनुनिर्वपतीत्यत्राग्नीषोमीयमितिनाद्धितोदेवताविधिरेवनोद्दे
श्यपरोवैरूप्यात्॥द्वंद्वोपात्तंचदेवतासाहित्यंविधेयविशेषणत्वाद्विवक्षितं॥

विवक्षितसाहित्यदेवताकश्चपुरोडाशयागःसामर्थ्यवाक्याभ्यांपशुदेवतासं
स्कारार्थः॥तदुक्तंकर्त्रधिकरणं॥तद्यथाग्नीषोमीयस्यवपयाप्रचर्याग्नीषोमी
यंपशुपुरोडाशमनुनिर्वपतीत्यत्रसत्यपितद्धितेनदेवतोपसर्जनत्वोपादाने
यागस्यप्रयोजनाकांक्षायांसत्यामग्नीषोमयोरेवसन्निहितयोःसंस्कार्यत्वंवि
ज्ञायतइतिनपशोरारादुपकारकत्वेनकल्प्यतेनहियूर्वेगुणत्वमुत्तरेणबाधा
न्येनविरुध्यतइति॥सचायंपुरोडाशयागःपरस्परसहिताग्नीषोमदेवतासं

स्कारकः प्रकृतौ विकृतौ तु रूढानापन्नायामेकस्यां देवतायां द्वयोश्चानिर्दिश्यते
यथाग्नेये सवनीये ऐंद्राग्ने च निरूढे॥ पार्वणे तु एकस्मिन्कर्मणि द्वयोश्च नानि॥
र्दिश्येते एकस्यैव कृतस्य कर्मणो द्वयोश्चैव कृतयोः कर्मणोः प्राकृतवद्कर्मस्था
नापत्यभावादिति विशेषः एवं च सति यत्र पार्वणपशुपुरोडाशन्यायो नास्ति तत्रा ने
कैषामेकद्रव्योपात्तत्वेऽप्युद्दिश्यमानसाहित्यस्याविवक्षितत्वात्प्रकृतौ प्रत्येकं विकृ
तावतिदेशो भवत्येव। यथा संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति॥ अत्र हि पौर्ण

मस्यधिकरणे पौर्णमासीशब्दे समुदायवाचित्वनिरासेन समुदायवाचितोक्तेरुद्दे
श्यत्वेन च परस्परसाहित्यस्याविवक्षितत्वेन पार्वणवैषम्यात्प्रत्येकमंगत्वेन प्रकृ
तौ तंत्रन्यायेन सकृदनुष्ठानेऽपि उपांशुयाजाग्नीषोमीयप्रत्येकविकृतौ वैमृधातिदे
शो भवत्येव यत्र याजादिवदिति॥ ननु पौर्णमासीमिति नोद्देश्यसमर्पकं अत एव
तदधिकरणे वाक्ययोर्विनियोगद्वैरूप्यं न तु श्रौतइति। तेन पार्वणावितिं यथावि
धेयत्वेन विवक्षितसाहित्यानामेव पर्वणां बाधपीयागाद्यत्वदशायामपि विवक्षित

साहित्यंतैवभवतिएवंविधेयपौर्णमास्युत्तरकालविशेषणपौर्णमास्याख्ययाग
त्रयसाहित्यस्यविधेयविशेषणविशेषपरस्यविवक्षितत्वेतादृशस्यैवयागत्रयस्य
वाक्यीयभाव्यत्वात्सत्येकविकृतावनतिदेशःस्यात् न वैषम्यात्पार्वणावित्यत्रहि
विवक्षितसाहित्यदेवताकस्यहोमस्यनप्रत्येकंदृष्टार्थतयांगत्वंसंभवतीतिविधे
यसामर्थ्यादुद्देश्यसाहित्यविवक्षालाभ्यतदुक्तंनवाक्यायविनियोगमात्रान्
वैमृधस्यतुविवक्षितसाहित्यपौर्णमास्याख्ययागत्रयोत्तरमनुष्ठितस्यापिप्रत्येक

मदृष्टार्थतयांगत्वंसंभवतीतिनसामर्थ्येनोद्देश्यसाहित्यविवक्षालाभ्यतदुक्तिपूर्वका
लविशेषणतादृशयांसाहित्यविवक्षायामप्युत्तरकालमविवक्षितसाहित्यतायांनिन
कोपिविरोधइति॥ननुनत्वदुक्तसामर्थ्यपार्वणहोमयोरुद्देश्यविवक्षालाभहेतुर्येन
वैमृधेतदभावाद्वैषम्यंस्यात् किंतूद्देश्यसमर्पकंपदंकल्प्यतेपार्वणहोमयोरितिलभ्यै
वोक्तंतेनैवन्यायेनवैमृधेपितत्कल्प्यते॥नचकल्पितवाक्येसाहित्यविवक्षादावपिवाक्य
भेदोभवति॥तदुक्तंचित्राधिकरणेभूयमाणस्यवाक्यस्यन्यूनाधिकविकल्पने॥

क्षणावाक्यभेदादिदोषोनानुमितेत्वसाविति॥तत्रराणकग्रंथःविवक्षितार्थापेक्षया
न्यूनत्वाभ्युपगमेलक्षणावाक्यभेदोआधिक्याभ्युपगमेत्वादिशब्दोक्तमानर्थक्यं॥
यद्वान्यूनस्याधिकार्थविषयत्वकल्पनेलक्षणावाक्यभेदगौणत्वाध्याहारदोषा
इत्यर्थःन्यूनत्वेनलक्षणावाक्यभेदोआधिक्येचानर्थक्यं॥अन्यथात्वकल्पनेविप
रिणामव्यवहितकल्पनाव्यवधारणकल्पनादोषाइति॥तत्रोदाहरणानि॥
तत्रविवक्षितार्थापेक्षयान्यूनत्वाभ्युपगमेलक्षणेत्यत्रोदाहरणं।वाजपेयेनष्ट्वा

बृहस्पतिसवेनयजेतेति॥तत्रहिविवक्षितोर्थउत्तरकालविशिष्टबृहस्पतिसवांग
कत्वंवाजपेयस्यतदपेक्षयान्यूनोर्थःप्रसिद्धस्यैवबृहस्पतिसवस्यवाजपेयोत्तरत्वं
तदभ्युपगमेवाजपेयश्रुतौकाललक्षणेति विवक्षितार्थापेक्षयान्यूनत्वाभ्युपगमे
वाक्यभेदइत्यत्रोदाहरणं॥यदाग्नेयोष्टाकपालोमावास्यायांपौर्णमास्यांचाश्रुतो
भवतीति॥अत्रहिविवक्षितोर्थोद्रव्यदेवताकालद्वयविशिष्टयागविधिस्तदपेक्ष
यान्यूनोर्थःपूर्णमास्यधिकरणाद्वितीयपूर्वपक्षेशंकितोविद्वाक्यविहितयोःकर्म

णोर्द्रव्यदेवतमेवविधीयतेनयागविधिरितितदभ्युपगमेवाक्यभेदइति॥वि
वक्षितार्थापेक्षयाआधिक्याभ्युपगमत्वादिशब्दोक्तमानर्थक्यमित्यत्रोदाहरणं
आमनूस्यानमस्यदेवाइतितिस्रआहुतीर्जुहोतीति ॥अत्रहिसांग्रहण्या
मामकामोयजेतेतिप्रधानवाक्यगतमामकामपदानुषंगेणविवक्षितार्थापेक्ष
यामनहोमविधेराधिक्याभ्युपगमेमामकामपदानुषंगानर्थक्यं ॥अस्मिन्याख्या
ख्याने प्राकृतामत्वर्थलक्षणानेसंग्रहीतास्यादित्यपरितुष्याह्यपदेति॥न्यूनस्या

धिकार्थविषयत्वकल्पनेलक्षणेत्यत्रोदाहरणंसोमेनयजेतेत्यादिमत्वर्थलक्ष
णान्यूनस्याधिकार्थविषयत्वकल्पनेवाक्यभेदइत्यत्रोदाहरणं॥सौर्यंचरुंनि
र्वपेद्ब्रह्मवर्चसकामइति॥तत्रहिस्वर्गकामपदाध्याहारंविभजिन्यायेनचतु
र्थेशंकितंनिरसितुमशक्यंब्रह्मवर्चसस्यान्वाचयत्वेप्रमाणाभावाद्ब्रह्म
वर्चसमात्रफलत्वेनन्यूनस्यस्वर्गकल्पनयाधिकार्थत्वेफलद्वयसमावेशा-
द्वाक्यभेदापत्तिरिति॥न्यूनस्याधिकार्थविषयत्वकल्पनेगौणत्वदोषइत्यत्रो-

दाहरणं॥ सृष्टिरूपदधातिप्राणाभृतउपदधातीति॥ अत्रहिसृष्टिशब्देन
ष्टिशब्दवंतएवमत्रोच्यंतइतिन्यूनमस्यगौण्याख्याअसृष्टिशब्दवतामपि
मंत्राणांग्रहणेनाधिकार्थत्वेगौणत्वमेवदोषःसत्वगत्याव्रीहियववविकल्पव
दंगीक्रियते॥ एवंप्राणाभृदुदाहरणंद्रष्टव्यं॥ न्यूनस्याधिकार्थविषयत्वे
ध्याहारदोषइत्यत्रोदाहरणं॥ विश्वजितायजेतेति॥ अयमप्यगत्यांक्रियते
तृतीयव्याख्याने॥ न्यूनत्वेलक्षणावाक्यभेदोआधिक्येचानर्थक्यमित्यस्यार्थः

अधिकस्यसतोन्यूनत्वेन्यूनस्यसतश्चाधिक्यइति॥ तत्राधिकस्यसतोन्यून
त्वकल्पनेलक्षणेत्यत्रोदाहरणंचतुरवत्तंजुहोतीति॥ अत्रहिजुहोतेर्द्वेवतोद्दे
शत्यागविशिष्टद्रव्यप्रक्षेपवचनस्याग्नेयादिचोदनयैवेतरयोरंशयोः
प्राप्तत्वात्प्रक्षेपमात्रपरत्वेनन्यूनत्वेलक्षणा॥ अधिकस्यसतोन्यूनत्वेवाक्य
भेदइत्यत्रोदाहरणं॥ वषट्कर्तुःप्रथमभक्षइति॥ अत्रहिप्राथम्यमात्रविधौ
भक्षानुवादात्प्राथम्यस्यचविधानादेकपदेचोभयासंभवाद्वाक्यभेदइति। न्यून

न्यूनस्यसतोधिकत्वेआनर्थक्यमित्यत्रोदाहरणंआमनमस्यामनमस्यदेवाइति
तिस्रआहुतीर्जुहोतीत्येवंपूर्वोक्तं॥अत्रहिभाव्यानुपादानान्यूनस्यसतःसांग्रह
ण्याग्रामकामोयजेतेतिप्रधानवाक्यगतग्रामकामपदानुषंगेणाधिक्यकल्पने
आनर्थक्यमापद्यतइतिअन्यथात्वकल्पनेविपरिणामइत्यत्रोदाहरणमाग्नेय
वाक्यं॥अन्यथात्वकल्पनेव्यवहितकल्पनेत्यत्रोदाहरणं॥प्रतितिष्ठंतिहवापए
तारात्रीरुपयंतीति॥अत्रहिउपेयुरित्यन्यथात्वकल्पनेयेप्रतितिष्ठंतिइतिव्यवहि

तकल्पनाभवतिसात्वगत्यांगीक्रियते॥अन्यथात्वकल्पनेव्यवधारणकल्पने
त्यत्रोदाहरणं॥यावतोऽश्वान्प्रतिगृह्णीयात्तावतोवारुणांश्चतुष्कपालान्निर्वपे
दिति॥ततश्चपार्वणहोमयोर्वैमृधत्वोभयत्रकल्पितवाक्योपोद्घातदुद्देश्यसाहित्य
विवक्षयाविकृतावनतिदेशइति॥अत्रब्रूमःसूक्तवाकविभागाधिकरणेआग्नेया
द्युत्पत्तिवाक्येषुपिफलसामान्येविधिबलेनकरणत्वावगमात्फलवाक्यंतद्विशेष
मात्रार्थंततश्चोत्पत्तिवाक्येषुषण्णांकर्मणांषडाकांक्षाउत्पद्यंतइतिषट्प्रकरं

णानीत्युक्तं॥ अंगविधीनांचोत्पत्तिविधिभिरेवसहप्रकरणादेकवाक्यताकथ्य
तइत्युक्तंचित्राधिकरणे॥ उत्पत्तिवाक्यविज्ञातंकर्मसर्वंत्वनूद्यतइतिव्याख्या
तंचेदंसोमेश्वरेणतत्रपार्वणयोःसामर्थ्यस्योद्देश्यसाहित्यविवक्षाहेतुत्वा
भावप्रत्येकप्रकरणात्प्रत्येकमेवोद्देश्यताग्नेयादेःस्यादितिप्रत्येकंविकृता
वतिदेशापत्तिःअन्यथाप्रयाजादेरपिविवक्षितसाहित्येवेवकल्पितवाक्यवा
क्यभेदाभावात्प्रकरणेनवियोगात्प्रत्येकंविकृतावनतिदेशःस्यात्पर्वैमृधेपिव

तद्वदेवप्रकरणात्प्रत्येकमेवविनियोगःअतःपूर्वोक्तसामर्थ्यादेवपार्वणा
योरुद्देश्यसाहित्यविवक्षातःप्रत्येकविकृतावनतिदेशःवैमृधेतुतद्विपर्यय
सिद्धं॥ तस्माद्याज्ञिकधुर्याणांपार्वणःपायतोक्तिः॥ विकृतौवैमृधस्येति
न्यायज्ञैर्नाहतंवचः॥ ॥इतिश्रीमत्पदवाक्यप्रमाणपारावारपारीण
धुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंक
रकृतेमीमांसाबालप्रकाशेपार्वणवैमृधवैषम्यनिरूपणंअष्टमाध्या

यार्थसंग्रहश्च समाप्तः॥ ॥ऊहलक्षणमाहुर्माधवाचार्याअधिकरण
मालायांप्राकृतस्थानपतितपदार्थांतरकार्यतः॥ऊहप्रयोगोविकृतऊह्य
मानतयोहितइति॥अत्रकार्यतउपकारात्प्रयोजनत्वेनचास्यहेतुत्वंतेनो
पकारार्थमित्यर्थः॥अत्रचप्राकृतस्थानपतितेत्यनुक्तौपदार्थांतरंव्रीहितोय
वास्तदुपकारार्थंविकृतेपदार्थांप्रतरान्वयादेवान्यथाभूतेप्रोक्षणावघात
प्रयोगेतिव्याप्तिःस्यादतउक्तंप्राकृतस्थानपतितेति॥नचव्रीहिस्थानमापन्नाय

वाःप्रत्यक्षविधिनाभावेविधानेनविकारतःस्वशाखाच्चनिषेधानुवादान्नत्कार्यकारि
तेतिसोमेश्वरसंग्रहीतनवमोक्तस्थानापत्तिप्रमाणपंचकाभावात्॥अन्यथावेप
रीत्यस्यापिप्रसंगाच्च॥पदार्थांतरेत्वनुवादःनत्वेवहिविकृतत्वंसंभवतिनान्यत्रेति
अतस्तत्पदकृत्यंनकार्यं॥कार्यतइत्युक्तेसकृदवहंतीतिवाचनिकेविकृतप्रयोगे
